।।अथगायत्रीपद्धतिःप्रारंभः।।

श्रीगणेशायनमः॥श्रीसावित्र्यैनमः॥ॐम्॥सवितारंप्रण
म्यादौसावित्रीश्रीगुरूमुनीन्॥विश्वामित्रंवसिष्ठंचगायत्रीपद्ध ७
तिब्रुवे॥तत्रश्रीमान्सावित्रीमंत्रोपासकःप्रातःसंध्यापूर्वकंदृढ
यात्मकेरात्रेसुरीययात्मकेवाब्राह्मेमुहूर्तेशय्यायाःसमुत्था
यरात्रिनाम्नस्वत्कावासस्त्रीपरित्यायतात्कोत्थिकमानरूपंकृत्वा
शुचिराचांतःशुभासनमास्थायस्वशिरसिश्वेतसहस्रकमलक
र्णिकायांयोगपीठोपरिनिजगुरुंध्यायेत्॥सयथा॥श्वेतवर्णंत्रि
नेत्रंचसहस्रदलसंयुतं॥श्रीगुरुंपरमात्मानंध्यायेद्ब्रह्मस ८

त्करं॥द्विभुजंनेत्रंद्विभुजस्योरंकुरुरकलशोज्वलं॥पद्मासनंसदाप्रा
तर्ध्यायेदखिलसिद्धदं॥२॥इतिध्यात्वामानसैरुपचारैःपूजयि
त्वा॥अज्ञानतिमिरांधस्यज्ञानांजनशलाकया॥चक्षुरुन्मीलि
तंयेनतस्मैश्रीगुरवेनमः॥नमोस्तुगुरवेतस्मैगायत्रीरूपिणे
सदा॥यस्यवागमृतंहंतिविषंसंसारसंज्ञकं॥३॥इत्यनेनप्रणमेत्॥
ततस्तच्चरणारविंदनिष्यंदमकरंदधाराभिरात्मदेहमभिषिंचंवि
भावयेत्॥ततस्तत्रैवश्रीगुरोक्षमस्वेतिविसर्जयेदितिगुरुध्यानं॥
ततोमूलमंत्रेणप्राणायामत्रयंकुर्यात्॥तद्यथा॥सप्राणायामः॥
पूरककुंभकरेचकास्त्रिगात्रयात्मकःकुंभेअंगत्रयात्मकःप्रोक्तः

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

पूरकं कुंभकं रेचकं रीतिताद्यरूपमाहविश्वामित्रसंहितायां। क
निष्ठानामिकांगुष्ठैर्यनासापुटधारणं॥प्राणायामः सविज्ञेयः स्त
म्भनीमध्यमेविना॥१॥दक्षिणेरेचकंकुर्याद्वामेनापूरितोदरः॥कुंभ
केनत्रिरावृत्याप्राणायामस्यलक्षणं॥२॥दशप्रणवसंयुक्तागायत्री
शिरसासह॥त्रिःपठेदायतःप्राणप्राणायामःसउच्यते॥३॥उच्चा
रयंस्तुप्रणंश्वासैर्नैकेनमंत्रवित्॥उदरंपूरयित्वानुनासाभ्यांदक्षमा
रुतः॥४॥प्राणायामोभवत्येवंपूरकोदरपूरकाः॥विधायस
र्वगात्राणिश्वासोच्छ्वासविवर्जितः॥५॥संहृत्यकुंभवत्तिष्ठेत्प्राणा
यामसकुंभकः॥मुंचेद्वायुंतथैकेनश्वासेनामेत्रमंवित्॥६॥

निश्वासमोगयुक्तंरेचयंवास्वनरेचयेत्॥रिचकस्त्वेषसंप्रोक्तः
प्राणायामोनसंशयः॥७॥सचमूलेनतद्वत्कोप्रणवेनका
र्यीः।प्राणायामंत्रयंकुर्यान्मूलेनप्रणवेनवेतित्रेवोक्त्वात्॥८॥
तल्लमाहवसिष्ठसंहितायां।आसनेसम्यगासीनोयामेनापूर्य
चोदरं॥कुंभकेनत्रिरावृत्यादक्षिणेननुरेचयेत्॥तद्यथा॥जिह्वत
यावतःस्थलिकासनोनाभ्यूर्ध्वाराधितानितंबनिःसाविंप्रण
वंसमुच्चारयन्॥इडयानाभनाडयाद्वायुनापूर्यमूलाधारंप्रापय्यांगुष्ठकनिष्ठानामिकाभिनासापुटौविधृत्यदशप्रा
णवसंयुक्तांगायत्रींद्वादशारंप्रणवंवाजपत्संवायुस्तंभवित्वावि

गत्या दक्षिणनाड्या रानेरानेस्तंवायुरेचयेदित्येकः प्राणायामः
पुनस्तथैवपिंगलयावायुरानेःरानेःसमालक्ष्यतथैवकुंभयित्वात
थैवरुड्यारेचयेदित्यन्याः।एवंवैपरीत्येन।यनैवसंत्यजेतेनपूरये
च्छनैःततः।रेजयेच्चततोन्येनरानैरेवंपुनःपुनरितियोगयुक्तोभ्या
सेनत्रीन्प्राणायामान्विधायस्थरात्रिरंनिर्मलंभावयेत्।इत्येवंस
र्वत्रकर्मदौकमीते।।तथोक्तं।।ततःरात्र्यल्पमार्गेणप्राणायाम
मंसमाचरेत्।।त्रिषट्कृत्वःसमावारंवापूरतःपरतोजयादिति।।त
थाच।।क्वचिःप्राणायामान्प्रणवसहितानोंकारपूर्वान्प्रभातेसायं
चमतिदिवसमेनंवितनुते।।द्विजोपस्तभूणहरणलदोषैरकलि

तंपुनंत्येतेमासादिहदुरितंतूलोघदहनः।।२।।त्रायंत्यमीषद्विरदी
माभैर्जन्मांतरोपार्जितपापपुंजात्।।संवत्सराद्वत्सपदंतदेकंप्रकाश
यंत्येवयदस्फटाख्यमितिविश्वामित्रसंहितायां।।प्रणवमात्रानुतन्मं
त्रोच्चारणोपलक्षितःकालविशेषःजानुप्रदक्षीकृत्यनुतनावि
लंबितं।।क्रियतेचांगुलीस्फोटःसामात्रापरिकीर्तिते।।त्युक्तेवसि
ष्ठसंहितायां।इतिप्राणायामविधिः।अथगायत्रीयोगध्यानंकुर्या
त्ततोमूलाधारेत्रिकोणंकामंबालार्कवर्णंसत्वरजस्तमोगुणाक्रांतं
बिंदुसंचित्यतद्ध्यै कुंडलिनीशक्तिंचिद्रूपांतडिद्भासमणालांतरा
लतंतुल्यांप्रकृतिभुजगाकारांसार्धत्रिनेत्रयेनस्थितांमनोदंडे

नोक्षाप्य॥ॐकारेणगुरूपदिष्टविधिनासुषुम्नामार्गेणमूलाधा
रस्थाधिष्ठानमणिपूरकानाहतविशुध्याज्ञाख्यषट्चक्रभेदक्रमे
णोत्थिरस्थिताधोमुखसहस्रदलकमलंनीत्वातत्रस्थितचंद्रमंडला
द्विगलदमृतधारयारूपावर्णमध्यातांकुंडलिनींसंतर्प्यात्रिशु
ध्यादिक्रमेणपुनर्मूलाधारंनयेत्॥इतियोगंविभाव्यमंत्रयोगंनिदर्शा
तूसयथा॥मूलाधारादिब्रह्मरंध्रांतंमूलवियोगायत्रीउद्यद्दिनक
रप्रभांविभाव्यतदात्मानमानंदमन्येतेतिमंत्रयोगः॥ततोहृदयकम
लेवक्ष्यमाणध्यानेनयथोक्तरूपासाविश्रीभगवतीध्यात्वा॥तत्रभा
पट्टलामंत्रेःवक्ष्यमाणक्रमेणगायत्र्याऋष्यादिन्यासंएवंकृत्वा

संपूजयित्वा॥मंत्रगुरुदेवतात्मकत्वेनात्मानंभावयेत्॥यथाशक्ति
गायत्रींजप्त्वासमर्प्यस्तुत्वानत्वादेवीमाज्ञांप्रार्थयेत्॥त्रैलोक्यचैत
न्यमयिश्रीत्रिशक्तियोगीश्वरित्यंचरणौनयेत्॥प्रातःसमुत्थायतत्व
प्रियार्थंसंसारयात्रामनुवर्तयिष्ये॥२॥जानामिधर्मंनचमेप्रवृत्ति
र्जानाम्यधर्मंनचमेनिवृत्तिः॥त्वयाहृषीकेशहृदिस्थयाहंयथानि
युक्तोस्मितथाकरोमि॥इत्याज्ञांप्रार्थ्य॥प्रातःप्रभृतिसायांतंसा
यादिप्रातरंततः॥यत्करोमिजगद्धात्रेतदस्तुतवपूजनं॥१॥इत्य
नेनसर्वंसमर्प्यविष्वद्देवीगायत्र्यैसमर्प्य॥देवतारूपोभूत्वाभूमिप्रा
र्थयेत्॥सयथा॥समुद्रमेखलेदेविपर्वतस्तनमंडले॥विष्णुपत्नी

नमस्कृभ्यंपादस्पर्शक्षमस्वमे॥इत्यनेनप्रार्थ्य॥श्वासानुसारेणतस्यो
पादंनिधायगृहाद्बहिरपराजितायांदक्षिणागच्छन्मलमूत्रोत्सर्गार्थं
गच्छेत्॥इतिप्रातर्निष्क्रमणविधिः॥ततः स्मृत्युक्तविधिनामलमूत्रो
त्सर्गशौचमाचमनंचकृत्वा॥तान्त्रिकमंत्रेणदंतधावनंकुर्यात्॥ते
यथा॥स्मृत्युक्तविधिनानिषिद्धेतरदिनेविहितकाष्ठेननिषिद्धे
तरकाष्ठेनवाद्वादशांगुलंपाणिनाद्विधावा॥प्राङ्मुखोवाप्युदङ्मुखोमौनी॥आ
युर्बलंयशोवर्चःप्रजाःपशुवसूनिचब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहि
वनस्पते॥इतिस्मृत्युक्तमंत्रपुरःसरं॥ॐक्लींकामदेवायसर्वजन
प्रियायनमः॥इत्यनेनकाष्ठमभिमंत्र्यतेनचप्रादक्षिण्येनदंतधा

वनंविधाय॥ततःकंठशुष्यत्यशुचौदेशेअग्नतस्त्यजेत्॥ततोमूले
नमुखंप्रक्षाल्यद्विराचमनंकुर्यात्॥तद्यथा॥शौचाचारेतथापानेस्प
ष्ट्वास्पृष्ट्वाचचर्वणे॥दोराणाचमनंकुर्यान्नाभिभिःकेशवादिभिः॥१॥
संध्यायांकर्मकालेचस्मृतेराचमनंभवेत्॥ब्रह्मयज्ञेतुवैकुर्यादृङ्मा
मस्पर्वकंद्विजः॥२॥गायत्रीमंत्रजाप्यादौदेव्याःपादैःपृथक्पृथक्त्रिकं
चभौतिकमंत्रेणभूतशुद्धीसमीरितं॥३॥प्राणप्रतिष्ठासमयेस्वात्म
तत्वादिभिःविवेत्॥तथैवमातृकन्यासेसर्वकर्मक्षमऋतेः॥४॥गो
कर्णेतुतर्जनीमात्रजलंविवेत्॥तेनदक्षिणकर्णंपीत्वापुन
राचमनंचरेत्॥५॥अंगुष्ठानंसमाकुंचमध्यमाभ्यर्पणं॥

लोकर्णं तद्धि विज्ञेयं सर्वेष्वाचमनेष्विह ॥८॥ संहतांगुलिहस्तेन पू
रयित्वांबुवीक्षितं ॥ मुक्तांगुष्ठकनिष्ठाचत्रिःपिबेद्ब्रह्मतीर्थतः ॥
७॥ शीतलं निर्मलं चांबु मधुरक्षारवर्जितं ॥ त्र्याचम्याचमनेस्था
दैवेपित्र्येचकर्मणि ॥८॥ तत्रपुराणाचमनं ॥ केशवादित्रिभिःपीत्वा
द्वाभ्यांप्रक्षालयेत्करौ ॥ गंडौोष्ठौसंमृजेद्द्विर्द्वैरेकंपाणिपादयोः ॥९॥
मूर्ध्न्येकंनवसंख्यकानासाक्ष्णोःकर्णयोर्द्वयोः ॥ नाभौहृदिशिरस्ये
वंस्पृशेद्बाहुहृदंक्रमात् ॥१०॥ ओंकारपूर्वकंनामउंतेसंबोधनंनु
या ॥ चतुर्विंशतिसंख्याकैःनामभिःकेशवादिभिः ॥११॥ स्नात्वाहंतंप्राश्य
यद्वारिनमोंतंस्त्रीयदथा ॥ प्रक्षाल्यपादहस्तौचीत्वाथसदोपवीतनः

पवः ॥ संहतांगुलिमूलेनद्विःप्रमृज्यात्ततोमुखं ॥ स्पृष्ट्वाकराभि
मंत्रोत्संहतांगुलिभिर्जलं ॥१३॥ अङ्गुष्ठेनमकरंसिंचतीभिःपादौचसंस्पृ
शेत् ॥ अंगुल्यग्रैस्तिसृभिर्मध्येरास्योर्ध्वंसमुपस्पृशेत् ॥१४॥ मध्येमध्ये
अलंस्पृष्ट्वास्पृशेत्तासामादिकामोक्रमो क्रे ॥ अंगुष्ठेनप्रदेशिन्याघ्राणंचे
यमुपस्पृशेत् ॥१५॥ अंगुष्ठानामिकाभ्यंचचक्षुश्रोत्रंपुनःपुनः ॥ अं
गुष्ठोपकनिष्ठाभ्यांनाभिंपश्चादुपस्पृशेत् ॥१६॥ तलेनहृदयंस्पृष्ट्वा
स्पृशेदंगुलिभिःशिरः ॥ अंगुल्यग्रैर्दक्षिणादिवामकरतलेद्वयंस्पृशे
त् ॥१७॥ अनेनविधिनाविप्रःकुर्यादाचमनंसदा ॥ अथमंत्राचम
नं ॥ देव्यापादेत्रिभिःपीत्वाचाङ्गैर्नवभिःस्पृशेत् ॥ सकृन्नाहृ

तिभिश्चैव शिखां मंत्रैः स्पृशेल्लोकमातृ॥ इत्याचम्य शिखाबंधं कुर्यात्॥ सर्वोक्तो विश्वामित्रसंहितायां॥ शिखायां ब्रह्मग्रंथिस्तु प्रोक्तः संध्यादिकर्मसु॥१॥ कूर्चग्रंथिस्तथा शैवे कर्मणि द्विजसत्तम॥ वैष्णवे विष्णुग्रंथिश्च कर्तव्यो वैशाखकर्मणि॥२॥ स्वशाखोक्तो शिखाधार्यो उक्तस्थानेद्विजोत्तमैः॥ विद्रुद्रैः क्षत्रियैरेकाधार्यो पतिभिः सदा॥३॥ शिखाधास्मीत्यरावृत्यनामतोदक्षिणेनतु॥ ग्रंथिछेद्यमावैश्यब्रह्मग्रंथिःप्रकीर्तिता॥४॥ केवलंबंधनंशौद्रीद्विरावृत्तिस्तुवैष्णवी॥ गुरूपदेशविधिनाशिखाबंधंसमाचरेत्॥ शिखाबंधंविनाकर्मनसिध्यतिफलार्थिने॥ प्राणायामंविनाजाप्यं

बीजमंत्रंयथेरितं॥ यथासनोरतेध्यानंतंतंलक्षंचयत्॥ तस्मात्सर्वप्रयत्नेनफलार्थीसाधकोत्तमः॥ आसनंप्राणसंरोधंशिखाबंधसमाचरेत्॥ इतिवसिष्ठसंहितावचनात्॥ अथासनं॥ पादुपरिनिक्षिप्यसव्यंपुनस्तथोपरि॥ पुनःकरंचनिक्षिप्यसिध्यासनंमुदीरितं॥१॥ उत्तानौचरणौकृत्वाऊरुसंस्थौप्रयत्नतः॥ ऊरुमध्येतथोत्तानौपाणीपद्मासनंभवेत्॥२॥ जानूर्वोरंतरेसम्यक्कृत्वापादतलेउभे॥ सऋजुकायःसमासीनःस्वस्तिकंतत्प्रचक्षते॥३॥ इतिप्रसंगात्आसनलक्षणं॥ एवंबद्धशिखश्चम्यशुचिर्देशात्मनोयत्नयादीगछेत्॥ तत्रगत्वास्त्रमंत्रेणतोयंप्रक्षाल्यतत्रस्नानीयंस्थापयित्वानिर्मलस्नानंविधाय॥ स्वशा

क्तमार्गेण वैदिकस्नानं वौराणिकं वाकृत्वा तान्त्रिकमाचरेत्॥ इति वसिष्ठवचनात्॥ अथ स्नानमन्त्रविद्याभिस्नानं कुर्यात् यथाविधिः॥ तद्यथा॥ नाभिमात्रोदके स्थित्वा नज्जोर्ध्वं वा शुचौ दिवं दनपूर्वकं मूलमंत्रेणत्राणायामत्रयं कृत्वा॥ मूलमंत्रस्य ऋष्यादिकरषडंगन्यासं विधाय गायत्रीरूपमात्मानं ध्यात्वा॥ उरसोमूलमंत्रेण चतुर्हस्तमितं चतुरस्रं तीर्थं प्रकल्प्य तत्र गंगे च यमुने चैव गोदावरी सरस्वती॥ नर्मदा सिंधुकावेरी जले स्मिन्सन्निधिं कुरु॥ १॥ इत्यनेन तीर्थमुद्रेणावाहनमुद्रया सूर्यमंडलात्तत्रमानीय॥ वंमित्यमृतबीजेनधेनुमुद्रया मृतीकृत्य कवचमंत्रेणावगुंठ्यास्त्रमंत्रेणरक्षोदिकाभिः संरक्ष्य चक्रमुद्रांप्रदर्श्य॥ गायत्र्याष्टधाभिमंत्र्यत

तु केवक्ष्यमाणप्रकारेण गायत्रीयंत्रं विभाव्यतदुपरि यथोक्तरूपांसावित्रीं ध्यात्वामाहनादिकंकृत्वाजलेनैवदूजयित्वासंस्नाप्यतत्रावाहितस्तंतीर्थमत्यंगुष्ठादिभिरंगुलीभिःश्रोत्रादिद्वाराणिविधत्यमसागायत्रीमुच्चरन्देवाश्चरणतलेस्मिन्स्तीर्थंजलेत्रिर्निमज्जेत्॥ ततोगायत्र्यैनदादराधात्रिधावाजलंजलेनैवस्त्रिरसिंचयात्॥ ततोमूलेनैवत्रिराचम्यमूलेनैवदेवीत्रितर्पयित्वासंहारमुद्रयाक्षमस्वेतिदेवींहृदिविसृज्यतीर्थंसूर्यमंडलेविसृजेदितिगायत्रीस्नानविधिः॥ ततोजलादुत्तीर्यमूलाभिमंत्रितेधौतेवाससीपरिधायमूलेनैवपूर्वोक्तलक्षणेनत्रिरंगावध्यापूर्ववद्विराचम्यप्राणायामत्रयंकृत्वातीर्थादिप

त्रिमृदादिनाश्वेतोर्ध्वपुंड्रकंविधाय तदुपरिविहितभस्मनात्रिपुंड्रकं यथास्थानंकुर्यात्॥श्वेतमत्स्योर्ध्वपुंड्रंचभसितेनत्रिपुंड्रकंकर्मणिविप्रःकुर्वीतचंदनेनयथातथा॥१॥तीर्थप्रदाचोर्ध्वपुंड्रंनकुर्यात्भ्रमोद्वितः॥यदिमोहात्करोतिनरकायोपपद्यते॥२॥आदौमूलधारणंकुर्यात्ब्रह्मनश्चततःपरं॥चंदनंस्वेष्टयाधार्यतीर्यगूर्ध्वंचमध्यतः॥३॥संध्याजपस्तथाहोमःस्वाध्यायोदेवतार्चनं॥ऊर्ध्वपुंड्रंविनाकर्मनिष्फलंस्यादितिस्मृतिः॥४॥ब्रह्मचारीगृहस्थोवावानप्रस्थोयतिस्तथा॥विनाभस्मत्रिपुंड्रेणनतिष्ठेज्ज्ञाननाद्विजः॥५॥इतिविश्वामित्रसंहितायांएकत्रिपुंड्रोर्ध्वपुंड्रोनामतृतीयःपटलः॥

DEHALI GAU

तत्संत्रेणसप्तधाभिमंत्रितेनकौलकंविधायवैदिकींसंध्यास्वरागखो
लकमार्गेणविधायगायत्रीजपंकुर्यात्॥तत्रसंध्याकालः॥उदयात्पू
र्वंनीसंध्याघटिकात्रयमुच्यते॥सायंसंध्यात्रिघटिकाअस्तादुपरिभा
स्वतः॥१॥उत्तमात्तारकोपेताधमालुप्ततारका॥अधमासूर्यसंयु
क्तात्रातःसंध्यात्रिधामता॥२॥उत्तमासूर्यसंयुक्तामध्यमालुप्तभास्क
रः॥अधमासक्षसंयुक्तासायंसंध्यात्रिधास्मृता॥३॥अहोरात्रस्यय
संधिसूर्यनक्षत्रवर्जितः॥सातुसंध्यासमाख्यातामुनिभिःतत्वदर्शि
भिः॥४॥संध्योत्तमातृतीयेवैपंचधांशेदिनस्यतु॥माध्याह्निकी
तदूर्ध्वंतापरंवास्याद्दिनेवहि॥५॥संध्याकालेतुसंप्राप्तेसंध्यां

वाप्यु पासते॥ जीवमानेभवेत्पुत्रो मृतःभ्रात्रा भिजायते॥ ६॥ कार्ये
तुवंदिता संध्या स्वर्गमोक्षप्रदायिनी॥ अकाले वंदिता संध्या सा च वै
ध्यावधूरिव॥ ७॥ काललोपे प्रायश्चित्तं॥ संध्याकालेत्वतिक्रांते
स्नात्वाचम्य यथाविधिः॥ जपेदष्टशतं देवीं ततः संध्यां समाचरेत्॥
८॥ जमदग्निः॥ एकाहं समतिक्रम्य प्रमादादकृतं यदि॥ अहोरा
त्रोषितोभूत्वा गायत्र्याश्चायुतं जपेत्॥ ९॥ दाक्षभंगे नृपक्षोभेरो
गार्ते सूतकेपि च संध्यावंदनस्य नदोषो मुनिभिः स्मृतः॥ १०॥
विप्लवेतिर्न दोषाय कदाचन॥ १०॥ यज्ञः॥ विवाहे च १०
यज्ञेभ्यपतिदर्शने॥ संध्यावंदनत्रयोयं नदोषो मुनिभिः स्मृतः॥ ११॥

एवंदत्वाचम्योर्ध्वके शीविरूपाक्षीतिमंत्रेणशिखांबध्वापुनर्गायत्र्या.
स्त्रिपदोचम्यदर्भधारणंकुर्यात्॥ तद्यथा॥ दर्भहस्तेनबध्नीयाच्छिखां
चेद्वोपवीतकं॥ आसनेकुशदर्भेचद्वौ होदर्भौत्रकीर्तिता॥ १॥ दक्षि
णानामिकायांचचतुर्दर्भपवित्रकं॥ वामेदर्भत्रयंधार्यं संध्यायांद्विज
सत्तमैः॥ २॥ इतिदर्भधारणं॥ प्राणायामान्कुर्यात्॥ तदुक्तं व्यास
संहितायां॥ कोष्ठस्थमनिलंसर्वनिःशेषंद्विजसत्तम॥ सूत्राधारेम
नः क्षेत्रादक्षिणाढ्योविरेचरेत्॥ सपछिरसमुच्चार्यसावित्रीत्रय
रूपिणीं॥ ४॥ वामनाड्यानिलंत्रेयध्यानेनाकृष्यषोडशैः॥ कुंभकेपु
नरुच्चार्यविष्णुध्यानंसमाचरेत्॥ तथैवदक्षिनाड्याचरुद्रध्यानं

समाचरेत्॥वायुविरेचयेत्प्राणः सावित्र्यापूर्वरूपया॥धि॥इत्य
कःप्राणरोधश्चद्वितीयःपूर्ववज्जपेत्॥येनैवसंत्यजतेनतथैवाप
रयेसुधीः॥धारयेद्रेचयेत्तद्वन्नैरंतर्यंपुनःपुनः॥एवंत्रिरूरो
धश्चजपादौचजपांतिके॥वैदिककर्मणिप्रोक्तःप्रायश्चित्तेयथे
च्छयोः॥भूरादिव्याहृतीःसप्तसतारादिसप्तमं॥गायत्रीमनुमु
च्चार्यव्याहृत्याचसमंसया॥चेज्जपंत्रंतदंतेचजपेत्प्रणवपूर्वकं॥
एषासपंचधाःप्रोक्तासावित्रीप्राणरोधने॥पंचाणुत्रीमिनी
सायपीडनंप्रणवाभिधा॥मुद्रयासर्वपापघ्नीगृहस्थानांप्रशस्य ११
ते॥अथप्राणायामंव्याख्यास्यामः॥प्रणवस्यपरब्रह्मऋषिः॥पर

मात्मादेवतादेवीगायत्रीछंदः॥अंबीजं॥ऊंशक्तिः॥मंकीलकं॥विय
दग्निरुदानस्थानंगोत्रंप्रमाणंवसिष्ठविश्वामित्रभरद्वा
जाऋषयः॥ब्रह्मविष्णुमहेश्वरादेवताः॥गायत्रीत्रिष्टुब्जगत्यश्छंदांसि
॥भूरंतरिक्षंदिवस्थानानि॥पीतसितकृष्णश्वेतानणीःजग्माह्यत्रमु
षुपदयोनस्थाः॥सप्तव्याहृतीनांविश्वामित्रजमदग्निभरद्वाजगौतमा
त्रिवसिष्ठकश्यपाऋषयः॥अग्निवायुसूर्यबृहस्पतिवरुणेंद्रवि
श्वेदेवादेवताः॥गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छं
दांसि॥श्वेतरक्तपीतकृष्णनीलपाटलपिंगलवर्णाः॥षड्जऋषभ
गांधारमध्यमपंचमधैवतनिषादास्वराः॥पृथिव्यग्निरजोवायुराका

त्राप्राणात्मनेबीजानि॥श्रीकीर्तिमायाधृतिमेधास्मृतिवाचःशक्तयः॥
भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनर्लोकतपोलोकसत्यलोकाः
कीलकानि॥आग्निवेश्यकाश्यपगोतमांगिरसभार्गवकौशिकवा
सिष्ठानिगोत्राणि॥ऋक्सामयजुरथर्वाणिछंदांसि॥शब्दस्पर्शरूपरसगंधात्मने बुध्यस्तत्वानिवि
नतांजलिकत्राकरविस्तृतयमपात्रागतथितव्यापकांजलिकामु
द्रा॥प्राणापानव्यानोदानसमानमनोबुद्धिजनितपापोपशमना
र्थेजपेविनियोगः॥ॐगायत्र्याविश्वामित्रऋषिःसवितादेवतागायत्री १२
छंदःशिरोमंत्रस्यपरब्रह्मऋषिःपरमात्मादेवता॥आकरी
गायत्रीछंदः॥सर्वेषांप्राण्यामेविनियोगः॥ॐअनाभौ॥ॐकं

ॐकंहृदये॥ॐपंमुखे॥ॐभूःपादयोः॥भुवःज्ञान्वोः॥स्वःगुह्ये॥महः
भौ॥जनःहृदये॥तपःकंठे॥सत्यंमूर्ध्नि॥ॐतत्सवितुर्ब्रह्मात्मनेशिरसेस्वाहा॥भर्गोदेवस्यरुद्रात्मनेशिखायैवषट्॥धीमहिसत्यात्म
नेकवचायहुं॥धियोयोनःज्ञानात्मनेनेत्रत्रयायवौषट्॥प्रचोदया
त्परब्रह्मात्मनेअस्त्रायफट्॥इत्यंगमंत्रानंगुष्ठादिक्रमेणकरयो
र्विन्यस्यहृदयादिषुन्यसेत्॥ध्यानं॥हृदयकमलमध्येसूर्यबिंबं
सनकंनिखिलभुवनबीजंसृष्टिसंहारहेतुं॥अनादिशक्तियुक्तंच
ज्योतिषंहंसरूपंसकलनिगमपूर्वंचिंतयेदोस्वरूपं॥इतिध्यात्वा॥
मानसोपचारैःपूजयित्वाप्राणायामंकुर्यात्॥ॐभूःॐभुवःॐस्वः

ॐमः ॐ जनः ॐ तपः । ॐ सत्यं ॐ भूर्भुवस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि । धियो योनः प्रचोदयात् । ॐ मापो ज्योतिरसोमृतं ब्रह्म भूर्भुवः स्वरोम् । इति सर्वत्र । सपञ्च रोगाय अर्थज्ञाता प्राणायामं कुर्यात् । अर्थविना प्राणायामफलं न स्यात् । योर्थज्ञः स फलमश्नुते ॥ इति वचनात् । तद्यथा । अथ देवतात्मनः सर्वप्राकृतः सर्वावभासकस्य तेजोमयस्य परमात्मनः सर्वात्मकद्योतनार्थं सर्वात्मप्रतिपादको यं गायत्रीमंत्रः । गायंतं त्रायते यस्मात् गायत्री प्राणादूर्ध्वमुक्तम् ३
यतः त्रिप्रणवः प्राणानां आयामो यत्रक्रियते तत् प्राणायामः । तत्र गायत्री प्रणवादि सप्तव्याहृत्यापेता शिरः समेता सर्ववेदसारा

मित्यथर्वशिरसि । एवं विशिष्टं गायत्री प्राणायामोरूपास्य । ब्रह्मरूपो भवति । ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । भूरिति सन्मात्रमंत्रउच्यते । रूपवर्णनिरूपं सर्वेषुप्रियमंरूपरूपं परमानंदं ब्रह्मपदं तपइति सर्वतेजोरूपं सत्यमिति विरहितं तत्यमुच्यते । सत्यंज्ञानमनंतं ब्रह्मेति भूर्भुवस्वरोमिति त्रैलोक्यं सम स्तमाद्भूत्यर्थः तदिति द्वितीयैकवचनं अनेनाखिलजडप्रतिष्ठितत्वं कथ्यते हेतुभूतं । उपनिषदि कथ्यमानं निरूपमं तत् सत् ब्रह्म तेजोमयं तत् सूर्यमंडलाभिधेयं परं ब्रह्माधिधीयते । असावादित्यो ब्रह्मेति वचनात् । सवितुरितिषष्ठ्येकवचनं -- प्रणिम्र सवइत्येतस्माद्धातो

रेतऽरूपंसर्वप्राणिमात्रस्यप्रसवितुरित्यर्थः वरेण्यं प्रार्थनीयंतिय
मादित्यरूपहृत्कल्मषैः सततंध्येयमित्यर्थः॥ भर्गः भंजूआमर्दने
भ्रजिमर्जनेइत्येतत्धात्वोर्धित्वारेतऽरूपभजनांपापभर्जने हेतुभूतेमि
त्यर्थः॥ देवस्येतिषष्ठ्येकवचनंदिवक्रीडाविजिगीषाविहारद्युतिस्तुति
स्वप्नमदमोदकांतिगतिषुइत्येतस्माद्धातोरेतऽरूपंदिव्यतेक्रीड़तत्वा
त्॥ विजिगीषत्वात्॥ व्यवहारत्वात्॥ द्युतित्वात्॥ स्तुतित्वात्॥ योगस्व
प्नत्वात्॥ समदत्वात्॥ मोदकत्वात्॥ कांतित्वात्॥ गतित्वात्॥
ज्ञानत्वात्॥ प्राप्यत्वात्॥ धीदेवस्यधीमहि॥ धेचिंतायांधा १४

सावादित्योहिरण्मयःपुरुषःसोसावहमितिचिंतयामः॥ धियः द्वि
तीयावऊवचनं॥ यःछांदसत्वात्॥ लिंगव्यत्ययः॥ पतेजः स्थैर्यंजाठरा
ग्निंचयंवरेण्यश्रेष्ठंभर्गःपापभंजनहेतुभूतंनोअस्माकंधियःबु
द्धीश्चोदयस्करेषुकर्मसुप्रचोदयात्॥ चुदप्रेरणेधातुःप्रवर्तयेदित्यर्थः॥
इतिभारद्वाजीयधर्मशास्त्रव्याख्यायांस्मार्तव्याहृतिहोमविधौआपउं
दकंब्रह्मेत्युच्यते॥ आपोनाऽतिश्रुतेर्ज्योतिरितिमंत्रसंहितायां
त्मकंअमृतंकेवल्यआत्मत्वंतद्ब्रह्मैवानंदपदंतत्किंभूर्भुवस्वरोमित्येवा
क्षरंरूपंचगणीत्मकंअयमेवपंचाक्षरीमंत्रःप्रणवादिप्रणवांतोवाऽ
स्यर्थंगिरसस्सूत्रएवमर्थंस्मरन्ब्रह्माहमस्मीतिभावयन्॥ प्राणा

यामन्त्रयंकृत्वाममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातःसं
ध्यामुपास्त्रिष्वाइतिसंकल्प्य॥माजनंकुर्यात्॥तिसृभिर्माजनंकुर्यादा
हिष्ठाकुरुतोदकेः॥पादेपादेक्षिपेन्मूर्ध्निप्रतिप्रणवसंयुतं॥आत्मानंप्रणवे
नैवपरिषिच्यजलेसकृत्कुर्यात्प्रणवःपादेमार्जनंतुकुरुतोदकैः॥यस्यक्ष
यायेतिजलंसकृन्मूर्ध्निप्रक्षिपेदधः॥स्रुचाहस्तेनवामेनतटेनयादकेषु
च॥पाणिनादक्षिणेनैवमार्जयेत्सकृन्नतुः॥पाणिस्तुताटकेनैवाम
हस्तोदकेनया॥गृहेतुमार्जनंकुर्यान्नातथेत्यब्रवीन्मनुः॥आपोहिष्ठेति
तेवस्यसिंधुद्वीपआपोगायत्रीमार्जनेविनियोगः॥आपोहिष्ठाम
योभुवःॐआपोजनयथाचनः॥९॥सूर्यश्चेतिमंत्रस्ययाज्ञवल्क्यो

पनिषदृषिः॥सूर्यीमन्युमन्युपतयोग्नेरात्रिश्चदेवता॥प्रकृतिश्छंदः॥
ममाभ्यंतरशुध्यर्थेमंत्राचमनेविनियोगः॥ॐसूर्यश्चमाः॥दर्भानूवि
सृज्यकुशपाणिश्चमार्जयेत्॥प्रणवयुक्तसमस्तव्याहृत्यागायत्र्याआ
पोहिष्ठेतिनवपादैःस्रान्नोदेवीरितिसप्तभिर्मार्जयेत्॥नवपादमिति
क्रम्यअधर्वावसुसंख्यया॥तत्रंप्रणवेनैवमार्जनंसमुदाहृतं॥भुविमू
र्ध्नितथाकास्योआकास्योभुविमस्तके॥मस्तकेभुविमूर्ध्निस्यान्मार्जनं
नेतुदाहृतं॥इतिमार्जनं॥सतंचैकात्रंवाद्विपदावाजपेदृचं॥दृष्टि
नासापुटेनैवपापात्मानमपोहयेत्॥तज्जलंनाभितोवक्त्रंवामभा
गेक्षितोजपेत्॥आचम्यविसृजेदभीनूउनरन्यांश्चधारयेत्॥

भईनोअपिघातयमनइति जलंप्रदक्षिणीकृत्यअर्घंदद्यात्॥पा
णिभ्योंजलमादायगायत्र्यानाभिमंत्रितं॥रवेरभिमुखस्तिष्ठन्
त्रिरूर्ध्वंसंध्ययोःक्षिपेत्॥द्वौपादौतुसमौकृत्वाप्रक्षयेदुदकांज
लिं॥गोशृंगमात्रमुद्धृत्यत्यजमध्यजलेक्षिपेत्॥प्रादेशास्तुप्र
देशिन्यांताक्रोमध्यमयाभवेत्॥गोश्रृंगमनामिक्याविन
स्तिस्तुकनिष्ठया॥इतिगोशृंगलक्षणं॥जलेषघ्यंप्रदातव्यंज
लाभावेशुचिस्थले॥प्रातर्मध्यान्हयोःकालेउषायार्घ्यंजले १६
क्षिपेत्॥तथाचापस्तंबः॥इषमूर्जःसभातेषुमेधान्हसजुस
स्तितः॥उपविश्यतुसामान्हेजलेषघ्यंनक्षिपेत्॥कालो

त्तिक्रमणेयस्तुत्रिसंध्यमपिसर्वदा॥चतुर्घ्यंप्रदातव्यंतगायत्र्यात्रिर
स्तसह॥तज्जन्यंदुष्टयोगेनराक्षसीमुद्दिकाभवेत्॥योददातियथा-चा
र्घ्यंतस्योयंरुधिरंभवेत्॥असावादित्यमंत्रेणसोदकेनैवपाणिना॥प्रदक्षि
णमनुव्रज्यत्वा-चमेसंध्ययोर्द्वयाः॥मंदेहानांविनांविनाशायनिक्षिपेत्तु
जलांजलीन्॥प्रायश्चितार्थमाचम्यमुच्यतेदैत्यकृत्यया॥अथार्घ्यदा
नं॥सावित्र्यात्रिरर्घ्यंवेदयात्॥गायत्र्यागाथिनोविश्वामित्रऋषिः
सवितादेवतागायत्रीछंदः॥रंतिबीजंनीतिशक्तिः॥यमीतिकीलकं॥
अर्घ्यदानेविनियोगः॥ॐभूःतत्सवितुर्वरेण्यंविष्णुनात्मनेहृदयायनमः॥ॐभु
वःवरेण्यंविष्णुनात्मनेशिरसेस्वाहा॥ॐस्वः भर्गोदेवस्यधीमहिविष्णुना

स्त्रिरवायैवषट्॥ॐभूःधीमहिसत्यात्मनेकवचायहुं॥ॐभुवःधियोयो
नःज्ञानात्मनेनेत्रत्रयायवौषट्॥ॐस्वःप्रचोदयात्परब्रह्मात्मनेअ
स्त्रायफट्॥इत्यंगमंत्रानंगुष्ठादिक्रमेणकरयोर्विन्यस्यहृदादि
कन्यसेत्॥ॐभूर्भुवःस्वरोंपरोरजसेसावदोम्॥इतिदिग्बंधः॥
आदित्याभिमुखोभूत्वा॥वेदासारपरंज्योतिरूर्ध्वभूतपरात्परं॥
हृदिस्थितंसर्वगतंमंडलांतर्गतंशिवं॥चिंतयेत्परमात्मानंतपऊर्ध्वं
निरीक्षयेत्॥ॐघृणिःसूर्यआदित्योम्॥इत्यष्टाक्षरमंत्रंजप्त्वाअस्त्रो
पसंहारणंकुर्यात्॥अस्यश्रीअस्त्रोपहरणमंत्रस्य॥ब्रह्मऋषिः॥दे १७
वीगायत्रीछंदः॥श्रीत्रिमूर्तिरूपीपरमादेवता॥अंबीजं॥ऊंशक्तिः॥

मंकीलकं॥अस्त्रोपसंहारणार्थेजपेविनियोगः॥ॐअंअघोरास्त्राय
हृदयायनमः॥ॐघोंघोरास्त्रायशिरसेस्वाहा॥ॐत्रंब्रह्मास्त्रायशि
खायैवषट्॥ॐनांनारायणास्त्रायकवचायहुं॥ॐपांपाशुपता
स्त्रायनेत्रत्रयायवौषट्॥ॐसुंसुदर्शनास्त्रायअस्त्रायफट्॥इत्यं
गमंत्रानंगुष्ठादिक्रमेणकरयोर्विन्यस्यहृदादिषुन्यसेत्॥ॐघ्रौंघ्रौंघ्र
ास्त्रायेतिदिग्बंधः॥उत्तिष्ठदेविगंतव्यंपुनरागमनायच॥प्रवि
श्यहृदिविकृष्टंत्वंप्रविश्यहृदयंमम॥ॐप्रातर्देवीमित्यंचकंठेत्॥ॐहि
रण्यगर्भःसमवर्तताग्रे॥सत्रांसचक्रं॥सोरुमकैमहज्योतिरकैःज्यो
तिरहस्त्रिवः॥आत्मज्योतिरहशुक्रःसर्वज्योतिरसोम्यहं॥आना

यय यावा यया और्वाय ब्यो ॥ हरोद्भिपाप्मानं मेविद्धि ब्रह्मगाय ग्रामय
पाप्मानं मवधूनंतं ॐ ब्रह्मणेनमः ॥ एवं प्रत्यर्घ्यं जपेत् ॥ ओंपरोरजसे
सावदो ॥ आसावादित्योब्रह्म ॥ ततआचम्यसंध्यातर्पणंकुर्यात् ॥ गाय
त्र्याः छंदसष्यादिस्मृत्वा ॥ गायत्रीतर्पणे विनियोगः ॥ ॐ भूः पुरुषंत
र्पयामि ॥ सग्वेदंतर्पयामि ॥ मंडलंत० हिरण्मयंत० आत्मानंत० गा
यत्रीत० वेदमातरंत० सावित्रीत० संध्यांत० कौमारीत० ब्राह्मीत० उष
संत० निऋतंत० सर्वार्थसिद्धिकरींतर्प० सर्वमंत्राधिपतिंत० ॐ भूर्भुव
स्वःपुरुषंत० ॥ ६ ॥ दिराचम्य ॥ यदत्रसंस्थितंभूतंस्थानमाश्रित्यस
र्वदा ॥ स्थानंतत्कालतुंतत्सर्वंयत्रस्थंतत्रगच्छतु ॥ ॐ मित्येकाक्षरंब्रह्मे

नियाऊर्ध्वंजलस्था ॥ आसनशुद्ध्यादिभूतशुद्धिप्राणप्रतिष्ठामातृकान्या
सपूर्वकंगायत्रीजपंकुर्यात् ॥ तद्यथा ॥ कौशेयंवाघ्रचैलेयाचर्मतौलमथा
विवा ॥ वेत्रजंतालपत्रंवाकोवलंदर्भमासनं ॥ १ ॥ वस्त्रासनदारुशरणीत
णपल्लवनिर्मिता ॥ वर्जयेदासनंमंत्रीदारिद्र्यव्याधिदुःखदं ॥ गोरा
कुन्मन्मयंभिन्नंतथापाताद्यापिपल्लं ॥ कोहवि सदेवाकैरर्जयेदास
नंबुधः ॥ दानमाचमनंहोमंभोजनंदेवतार्चनं ॥ प्रोक्ष्यादेनकुर्वीतस्वा
ध्यायंचैवतर्पणं ॥ आसनाकूढपादस्तुजानुनोरीथजंघयोः ॥
कृतावसंस्थितिर्योयस्तुप्रोक्षादःसउच्यते ॥ ५ ॥ एथिव्यामेरुपृष्ठ
ऋषिःकूर्मोदेवतासुतलंछंदः ॥ आसनेविनियोगः ॥ चतुरस्रंपे

नु रूपांपीतांकूर्मोपरिस्थितांत्रातकोटियोजनांगांएथ्वींध्यायेत्समा
सने॥१॥एथित्वयाधृतालोकादेवीत्वंविष्णुनाधृता।त्वंचधारयमा
मित्यंपवित्रंकुरुचासनं॥इत्यासनंसंस्तापयेत्वा॥ॐभूर्भुवःस्वः॥कूर्मा
सनायनमः॥अनंतासनायनमः॥पद्मासनायनमः॥विमलासनाय
नमः॥सर्वशक्तिकमलासनायनमः॥आधारशक्तयेनमः॥दुष्टनिग्रा
हणायश्रीनृसिंहायनमः॥इत्यासनंसंपूज्यतत्रपद्मासनेनवीरासनेन
स्वस्तिकासनेनवोपविश्य॥अपक्रामंतुतेभूतायेभूताभुविसंस्थिताः॥
येभूतविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया॥अनेनवामपार्ष्णिघातत्रये १८
णभोमान्फट्मंत्रेणदिग्बंधान्विधाय॥ऊर्ध्वान्तरिक्षगान्विघ्नान्छोटि

काकारान्स्फालनेनोत्सार्यअग्निमुद्रयाग्निप्राकारंविधेयोर्ध्वके
शीतिशिखांवध्वाभूतलनघणवेनवाप्राणायाम्यत्रह्मायशीर्षपा
रंपथिक्रमेणस्वगुरुपादांबुजंतान्प्राणोमीतिशिरस्योजलिंल
ब्धोत्थायगुरुभ्योनमः॥मूर्तिनामस्कंधेगंगणपतयेनमूर्ति
दक्षिणस्कंधेसंसरस्वत्यैनमूर्तिनाभौदुंदुर्गायैनमः।वामकुक्षौ
क्षंक्षेत्रपालायनमः॥दक्षिणकुक्षौआराध्यदेवतायैआराध्यदेव
तायैगायत्र्यैनमः।हृदिनमोमहद्भ्यइत्यंचपठित्वा॥आचम्यप्रा
णानायम्यदेवाकालोस्मत्यागमचतुर्विधपुरुषार्थसिध्यर्थंश्री
परमेश्वरप्रीत्यर्थंगायत्रीमंत्रजपाधिकारसिध्यर्थंभूतशुद्धिप्रा

प्राप्रतिष्ठामात्रकान्यासादियोगपीठगायत्रीन्यासान्करिष्ये इति
संकल्प्यामूलाधाराद्युत्थितानियुतसहस्रप्रभाभासुरांविसतंतुरू
पांसुषुम्नामार्गेणहृदयकमलमार्गतांकुंडलिनींविभाव्यहृदयक
मलमार्गतांकुंडलिनींविभाव्यहृदयकमलाजीवंप्रदीपकलिकाकारं
गृहीत्वाद्वादशांतांबुजसहस्रदलगतंविभाव्यतत्रजीवात्मानं।ॐ
हंसःइतिमंत्रेणपरमात्मनियोजयेत्।।ततःपादादिजानुपर्यंते
चतुरस्रंपीतंपृथ्वीमंडलंतत्रपादागमनकृमागंधघ्राण
पृथिव्यग्नयेस्वाहेतिसमानवायुनासंस्मृत्यॐह्रींब्रह्मणेपृथिव्या २
धिपतयेनिवृत्तिकलात्मनेकुंकुटस्वाहा इतिमंत्रमुच्चार्यतांत्सर्वां

न्कुंडलिनीद्वाराअपक्वप्रविलापयामीत्यधःस्थानेसंहरेत्।।जानुबादि
नाभिपर्यंतंशुक्लमर्धचंद्राकारंजलमंडलंतत्रहस्तादानादातव्यरस
नाजलविष्णुप्रतिष्ठोदानन्यस्यात्।।ॐह्रींविष्णवेजलाधिपतयेप्र
तिष्ठाबलात्मनेकुंकुटस्वाहेतिमंत्रमुच्चार्यतान्सर्वान्कुंडलिनीद्वा
राआप्योप्रविलापयामीतिअग्निस्थानेसंहरेत्।।नाभ्यादिहृदय
पर्यंतंरक्तंत्रिकोणंवह्निमंडलंतत्रपायुविसर्गविसर्जनीयरूप
चक्षुस्तेजोरुद्रविद्यान्यानसंस्मृत्य।।ॐरूंरुद्रायतेजोधिप त
यविद्याकलात्मनेकुंकुटस्वाहेतिमंत्रमुच्चार्यतान्सर्वान्कुंडलि

नी द्वारावाह्यौ त्रविलापयामीतिवायुकोणेसंहरेत्॥ततोहृदादिभ्रूपर्यं
तंकृष्णवर्णंलंषट्विंदुलांछितंवायुमंडलंतत्रोपरक्तानंदविषयस्य श्रीस्व
रूपवाप्यात्रा नत्रात्यापानास्मरत्य॥ॐक्रैंईशानायवायव्यापि
पतयेश्रांतिकलात्मनेऊंफट्स्वाहा॥इतिमंत्रमुच्चार्यतांसर्वान्
कुंडलिनीद्वाराआकात्रोत्रविलापयामीत्याकात्रोसंहरेत्॥ततो
भ्रूमध्याद्वित्रत्यरंप्रपर्यंतंस्वछंनवुलमाकात्रामंडलेतत्रवाग्व
दनेवक्त्रंश्रीत्रोत्राद्काश्रासदाशिवश्रांत्यतीताप्राणासंस्मत्य॥ २१
ॐक्रौंसदाशिनायआकात्राधिपतयेश्रांत्यतीताकलात्मनेऊं

फट्स्वाहेतिमंत्रमुच्चार्यतांसर्वान्अहंकारेणत्रविलापयामीत्यहंकारे
त्रविलाप्यतमहंकारमहत्तत्वेमहत्तत्वंमहत्तत्वमात्माकासंज्ञकत्राद्त्र
स्वरूपार्थीहत्कैवल्यार्थभूतायात्रकृतौत्रविलापयामीतितांतथावि
धानेनत्यशुद्धबुद्धस्वभावेस्वत्रकात्रोसत्यज्ञानानंतानंदलक्षणेप
रमकारणेआदित्यवर्णेषरूपेपरत्रह्मणित्रविलापयामीतित्रवि
लापयेत्॥ततःशरीरस्यांतर्यामीऋषिः॥सत्यंदेवतात्रकृतिपुरुषं
छंदः॥सत्रशरीरयाषापपुरुषशोधनेविनियोगः॥ऋसुत्कोततःपु
रुषंशोधनेविनियोगः॥निःप्रभंपापमनादिभवसंचितं॥ब्रह्महत्या
शिरस्कंचस्वर्णस्तेयभुजद्वयं॥सुरापानहृदायुक्तंगुरुतल्पकटि

हृयं॥तत्संसर्गविदहंहृमंगप्रत्यंगपातकं॥उपपातकरोमाणंविगत्रम
श्रुविलोचनं॥अविवेकरवज्राधरंअहंताचमिधारकं॥असत्यश्वनकृ
कृष्णपैशून्यरसनाधरं॥क्रोधदंष्ट्रासमायुक्तंकामवर्षिणमद्भुतं॥
वामकुक्षिगतंमरुंक्रूरंरासभनिःस्वनं॥अंगुष्ठमात्रंमाधिष्ठानिर्दे
हेतंयथाविधिप्रतिपापपुरुषंविचिंत्य॥यमितिवायुबीजस्यकि
ल्बिषंधस्वर्षिः॥वायुर्देवता॥जगतीछंदः॥सशरीरपापपुरुषत्रो
षणेविनियोगः॥इत्युक्त्वा॥नाभिमूलेचषड्दलपद्मंवंचिंतये
त्॥तद्बाह्यबीजषट्कंचंचलध्वजेसंयुतं॥शंषंसंहृदयंसर्वशो

षणंत्रीदेवतं॥इतिध्यात्वा॥यमितिवायुबीजंपूरकप्रयोगेणषोड
शवारंहृदयमारंगोआवर्त्यरेचकप्रयोगेणद्वात्रिंशद्वारंचतुर्विं
तिवाआवर्तयेत्॥ततोद्वीजोत्थवायुनासशरीरंपापपुरुषंत्रोषितंविभा
वयेत्॥ततोरमित्यग्निबीजस्यकरथर्षिरग्निर्देवतात्रिष्टुप्छंछं
दः॥सशरीरपापपुरुषंदहनेविनियोगः॥इत्युक्त्वा॥चिंतयेत्हृदयो
ल्लत्रिकोणंवन्हिमंडलं॥विद्याकलापुरंरइदेवतंरसमीरितं॥इति
ध्यात्वा॥सर्यवत्॥पूरककुंभकरेचकप्रयोगेणवर्तयेत्द्वीजोत्थवन्हि
नापापपुरुषंससशरीरंदग्ध्वमितिभावयेत्॥तद्भस्मरेचयेत्॥ततः
वमित्यमृतबीजस्यहिरण्यगर्भऋषिः॥वरुणोदेवतात्रिष्टुप्छंदः॥आ

क्षावनेविनियोगः॥वारुणंमंडलंमूर्ध्निशुभ्रचंद्रार्धसन्निभं॥सित
पंकजकर्णिकंवस्याद्वरुणदैवतं॥इतिध्यात्वात्द्वीजपूरककुंभ
करेचक्रमुद्रयायोगेणपूर्ववदानर्पयेत्द्वीजस्फुताष्टेनस्वशरीरमाप्लाव
येत्॥लंमितिपृथिवीबीजस्यब्रह्मास्रषिः सुरोदेवतागायत्री
छंदःकठिनीकरणेविनियोगः॥इत्युक्त्वा॥आधारमंडलेपृथ्वी
मंडलेवज्रलांछितंचतुष्कोणंकठिनंपीतवर्णंसुरदैवतं॥लंबी
जेनसमायुक्तंध्यायेन्नासिकपूर्ववत्॥इतिध्यात्वा॥तत्द्वीजंपूरक
कुंभकरेचक्रमुद्रयायोगेणपूर्ववदानर्पयेत्द्वीथंजोकठिन्यनतन्मुद्राभाव

येत्॥ततोहमित्याकाशबीजस्यब्रह्मास्रषिः आकाशोदेवता॥पंक्तिछं
दः व्यूहनेविनियोगः॥इत्युक्त्वा॥आधारमंडलेरक्तंदादशांतेहेमज्वलं॥शां
तीकालाक्तंचिंतयाकाशदैवतं॥इतिध्यात्वात्द्वीजेनपूरककुंभकरे
चक्रमुद्रयायोगेणयथासंख्यमानर्पयेत्तुर्थेनाकाशेनावकाशंभावयेत्॥
एवंस्वशरीरंविचिंत्यपरमात्मनःसकाशाद्बुद्धिक्रमेणतत्वानिस्व
स्वस्थानंप्रापयेत्॥ततःपरमात्मनःसकाशाज्जीवंसोहमितिमंत्रेणहृ
दयकमलेमानयेत्॥ततःस्वशरीरंपापरहितंनवनिर्मलंसाचिन्मी
दैवताप्यनयोगंविभावयेदितिसंक्षेपतोभूतशुद्धिः॥भूतशुद्धिवि

हिनेन जपस्तजादिकंमुने॥सर्वं निरर्थकं विद्धि विपरीतफलार्थदं॥इति व
सिष्ठसंहितावचनादावश्यकीयंभूतशुद्धिः॥अथस्यदेहे प्राणप्रतिष्ठा॥
सा यथा॥हृद्दिक्षुनिधायाथ प्राणस्थापनमाचरेत्॥तेनोजन्मादि
कर्मक्रियासंस्कारसिध्यये॥षोडशप्रणवावृत्तीः कृत्वाशक्तिप
रांस्मरेत्॥बालार्कमंडलाभासांचतुर्बाहुंत्रिलोचनांपाशांकुशवर
दांश्चापंसानविनोदधतींभजे॥ॐअस्यश्रीप्राणप्रतिष्ठामंत्रस्य
ब्रह्मविष्णुरुद्रासषयः सम्यक्रुः सामानीछंदांसि॥चिद्रूपिणी २४
प्राणशक्तिर्देवता॥आंबीजंह्रींशक्तिः॥क्रोंकीलकंप्राणप्रतिष्ठा

यानियोगः॥इतिशिरोमुखहृदयगुह्यपादसंधीषु क्रमेणवि
न्यस्यकरषडंगान्यासंकुर्यात्॥सयथा॥ॐआंह्रींक्रौंअंकंखंगंघं
ंआंपृथिव्यपतेजोवायवाकाशात्मनेहृदयायनमः॥ॐइंचंछं
जंझंयंईशादुस्परीरूपरसगंधात्मनेशिरसेस्वाहा॥ॐटंठंडंढं
णं॥ॐओंनेत्वक्चक्षुरसनाघ्राणात्मनेशिखायैवषट्॥ॐएं
तंथंदंधंनंऐंवाक्पाणिपादपायूपस्थात्मनेकवचायहुं॥ॐपंफं
बंभंमंऔंवचनादानगमनविसर्गानंदात्मनेनेत्रत्रयायनौषट्
॥ॐअंयंरंलंनंशंषंसंहंक्षंः अंमनोबुध्यहंकारचित्तप्राणात्म
नेअस्त्रायफट्॥इत्यंगमंत्रानंगुष्ठादिक्रमेणकरयोर्विन्यस्यहृदा

दिङ्न्यसेत्॥ ॐ आं नमः नाभेरधरणपर्यंतं ॐ ह्रीं नमः हृदयान्नाभिपर्यंतं
ॐ क्रौं नमः मूर्ध्नो हृदयपर्यंतं यंत्वगात्मनेरं॥ असृगात्मनेत्वं मांसात्म
नेवं मेदात्मनेअस्थ्यात्मनेषं मज्जात्मनेसं शुक्रात्मनेहं प्राणात्मनेहं क्षं क्षात्मा
नेक्षं क्रोधात्मनेनम इति हृदयंन्यसेत्॥ ततो हृदि हृल्लेखां जपेत्॥ ॐ आं
ह्रीं क्रोंयरलंनंरूंषंसंहंक्षंहंसः सोहं स्वाहा॥ ममप्राणाइहप्राणाः॥
ॐ आं त्रिं त्यादिममजीवइहस्थितः॥ ॐ आं इत्यादिममसर्वेंद्रियाणि॥ ॐ आं
इत्यादिममवाङ्मनश्चक्षुश्रोत्रघ्राणजिह्वाप्राणाइहैवागत्यसुखंचिरं
तिष्ठंतु स्वाहा॥ हृदि हृल्लेखां जप्त्वादिषोडशसंस्कारसिध्यर्थेषोडशवारं
प्रणवंजपेत्वाध्यायेत्॥ रक्तां भोधिस्थपोतोल्लसदरुणसरोजाधिरू

ढः कराब्जैःपाशांकोदंडमिक्षुद्भवगुणमथमप्यंकुशंपंचबाणान्॥ बि
भ्राणासृक्कपालंत्रिनयनलसितांपीनवक्षोरुहाढ्यादेवीबालार्कवर्णां
भवतुसुखकरीप्राणशक्तिःपरानः॥ इतिध्यात्वामानसोपचारैःपूज
यित्वातत्स्वरूपोभूत्वामातृकान्यासंकुर्यात्॥ तदंगप्राणायामः॥
इडयापूरयेद्वायुंस्वरैःस्वशक्त्याकुंभयेत्॥ रेचयेत्पिंगलयेति प्राणा
मः समातृकाः॥१॥ अस्यश्रीअंतर्मातृकाबहिर्मातृकान्यासमंत्रस्य
ब्रह्माऋषिर्गायत्रीछंदःश्रीमातृकासरस्वतीदेवताहलोबीजा
निस्वराःशक्तयःविंदवःकीलकानिश्रीगायत्रीजपांगत्वेनन्यासेवि
नियोगःइतिसिद्धिं निरूप्यादिकरशिरआदिस्थानेषुविन्यसेत्करषडंग

न्यासं कुर्यात्॥ ॐ अं कं ४ आं हृदयाय नमः॥ इं चं छं ४ ईं शिरसे स्वाहा॥ ॐ
२६ ऊं टं ४ ऊं शिखायै वषट्॥ ॐ ऐं तं थं दं धं ४ कवचाय हुं॥ ॐ पं फं ४ औं ने
त्रत्रयाय वौषट्॥ ॐ यं रं लं वं शं षं सं हं ळं क्षं अः अस्त्राय फट्॥ इति षड्
ङ्गहृदयादिन्यासं कृत्वा अंतर्मातृकान्यासं कुर्यात्॥ ततः अकारादिषो
डशबीजानि कंठस्थाने विशुद्धिचक्रमेषोडशदले प्राग्दक्षिण्येन न्यसेत्॥
अं नमः आं नमः॥ इत्यादि॥ नकारादीनि द्वादशबीजानि हृदयस्थाने अ
नाहतचक्रे द्वादशदले॥ उकारादीनि दशबीजानि नाभिस्थाने म णिपू
रचक्रे दशदले॥ नकारादीनि षट्बीजानि लिंगस्थाने स्वाधिष्ठान २७
चक्रे षट्दले नकारादीनि चत्वारि बीजानि गुह्यस्थाने आधारचक्रे च

तुर्दले॥ हंक्षं द्वयं भ्रूमध्ये आज्ञाचक्रे द्विदले इत्यभ्यर्च्य येत्॥ आधारे लिं गा
नाभौ हृदयसरसिजे तालुमूलललाटे द्वयत्रयोडशारे द्विद्वादशदले द्वा
दशार्धचतुष्के॥ नासांते वालमध्ये एक कंठसहिते कंठेशखराणां हंक्षं
तत्वार्थयुक्तं सकलतनुगतं वर्णरूपं नमामि॥ ९॥ ततो वर्णमातृकान्यासः
तत्र सव्यादिन्यासः प्राग्वत्॥ अं नमः शिरसि। आं नमः मुखे। इं नमः दक्षि
नेत्रे। ईं नमः वामनेत्रे। उं दक्षिणश्रोत्रे॥ ऊं वामश्रोत्रे॥ ऋं दक्षिणनासापु
टे॥ ॠं वामनासापुटे॥ ऌं दक्षिणकपोले॥ ॡं वामकपोले॥ एं ऊर्ध्वौष्ठे॥ ऐ
अधरोष्ठे॥ ओं ऊर्ध्वदंतपंक्तौ औं अधोदंतपंक्तौ॥ अं कं खं गं घं ङं अः रसनाग्रे॥

कंदक्षवामबाहुमूले।।ऊं दक्षिणकरांगुल्यग्रे।।चं वामबाहुमूले।छं
वामकूर्परे।।जं नाममणिबंधे।झं नामकरांगुलिमूले।।ञं वामकरांगुल्यग्रे।।
कुक्षिवक्षोदरांभास्वत्कंटदक्षिणपादमूले।।ठं जानुनिऽदक्षमूलेत्यै।ढं पा
दांगुलिमूले।णं दक्षिणपादांगुल्यग्रे।।तं वामपादमूले।।थं वामजानुनि।।
दं वामगुल्फे।।धं वामपदांगुलिमूले।नं नामपदांगुल्यग्रे।।प दक्षिणपार्श्वे।फं
वामपार्श्वे बं पृष्ठे।भं नाभौ मं जठरे यं हृदये।रं दक्षांसे।लं वामांसे।वं कंठादिशां
दक्षकक्षायां।षं नाभिकक्षायां।संहृदादि।करद्वये।क्षं हृदादिपादद्वये।।लं ह
दादिमुखे।क्षं सर्वांगेऽनिविन्यस्यमातृकां सरस्वतीध्यायेत्।।पंचाशद्वर्ण
भेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षोदरांभास्वत्कपर्दकलितशशि

कलामिंदुकुंदावदातां।।अक्षस्रक्कुंभचिंतालिखितवरकरां श्रीक्षणोप
रसंस्थां सच्चाकल्यामनुछलनजघनभरांभारतीं तांनमामि।इतिध्यात्वा।
मानसेरुपचारैरुजपित्वा।।अकाराद्दिक्षकारांतांमातृकांअनुलोमविलो
मतोजप्त्वापुनरनुलोमतोजप्त्वा व्यापकत्वेनतत्तद्वर्णान्ततस्तानेवध्या
त्वा।।गायत्रीमंत्रन्यासंकुर्यात्।।सर्षिछंदोदैवतानिस्मृत्वा।।न्यासान्स
माचरेत्।।इतिवासिष्ठसंहितायांवचनात्।।तद्यथा।।प्राणायामत्रयं
कृत्वा।।अस्यश्रीगायत्रीमंत्रस्यविश्वामित्रऋषिः।।गायत्रीछंदः।श्रीस
वितृरूपिण्यैसावित्र्यैदेवतायैनमः।।हृदये।।ॐभूरेवीजायनमः गु
ह्ये ॐभुवःशिरोरूपायैनमः पादयोः ॐस्वःपंक्तीलेकायनमः।।सर्वां

२८ गो॥ मम चतुर्विधपुरुषार्थसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गायत्रीमंत्रज
पे विनियोगः॥ करसंपुटं गायत्र्या करन्यासं कुर्यात्॥ अथ न्यासः॥ ॐ
तत्सवितुर्ब्रह्मात्मने हृदयाय नमः॥ अंगुष्ठयोर्यं सामि॥ नरेण्यं शिरात्मने शि
रसे स्वाहा तर्जन्योः ॐ भर्गो देवस्य रुद्रात्मने शिखायै वषट् मध्यमयोः ॐ धीमहि
सत्यात्मने कवचाय हुं अनामिकयोः ॐ धियो योनः ज्ञानात्मने नेत्रत्रया
यौषट् कनिष्ठिकाभ्यां नमः ॐ प्रचोदयात् परब्रह्मात्मने अस्त्राय फट् करत
लकरपृष्ठयोर्न्यसामि ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः॥ वरेण्यं वि
श्वात्मने शिरसि भर्गो देवस्य रुद्रात्मने शिखायै वषट् धीमहि सत्या २८
त्मने कवचाय हुं॥ कं हृदारभ्य नाभिपर्यंतं धियो योनः ज्ञानात्मने नेत्रत्राय

यौषट् नेत्रयोर्ललाटे च ॐ प्रचोदयात्॥ परब्रह्मात्मने अस्त्राय फट् अस्त्रे।
ॐ भूर्भुवस्वरोमिति दिग्बंधः अथ व्याहृतिन्यासः॥ भूरादयोः न्यसामि भुवः ज्ञा
न्योः कथोः महः नाभौ जनः हृदयोः तपः कंठे सत्यं ललाटे परब्रह्मशिरसि अ
थपदन्यासः तत्पादयोः सवितुर्जंघयोः सवितुः वरेण्यं कट्योः॥ भर्गो नाभौ
देवस्य हृदि धीमहि कंठे धियः मुखे यः भ्रूमध्ये नः ललाटे प्रचोदयात् मूर्ध्नि॥
इति पदन्यासः ॐ तत्पादयोः सवितुः कुल्फयोः वरेण्यं जानुन्योः भर्गः रे
णुरेतिलिंगे देवस्य कट्योः धीमहि नाभौ गुदे धियः मेढ्रे यः नाभौ हृदि स्यं कंठे धीबलेन
तालौ हि नासिकायां॥ धिये नेत्रयोः यो भ्रूमध्ये योललाटे नः पूर्वमुखे प्रदक्षि
णपदे नो पश्चिममुखे दक्षिणे प्रचोदयात् मूर्ध्नि वलये गायत्र्याश्चतुर्विंश

त्यक्षरेषु पृथिव्यादितत्वदृष्टिः॥तत्र प्रथमपादेलोकत्रयदृष्टिः॥द्वितीय
पादेलोकालोकदृष्टिः॥तृतीयपादेप्राणादिदृष्टिः॥चतुर्थपादेब्रह्म
दृष्टिः॥प्रणवादिप्रणवांतंगायत्रीमंत्रचतुर्थचरणसहितंत्रिवार
व्यापकत्वेनन्यसेत्॥तद्यथा॥ॐभूर्भुवस्वःतत्सवितुर्वरेण्यभर्गोदेव
स्यधीमहि॥धियोयोनःप्रचोदयात्॥पादादिमस्तकपर्यंतंत्रिवार
न्यसेत्॥अथस्वदेहेयोगपीठन्यासः॥अंसद्वयोरुद्वयोपकट्यैत
त्रांकंचीठंरूपंनिजदेहंध्यात्वातत्रन्यसेत्॥ॐभूतोधारमहाकू
यरक्तवर्णायमंडूकाधारायनमः॥तदुपरिस्वाधिष्ठानपर्यंतंपंच
वर्णाययद्राभुजोयरक्तलक्ष्मावर्णोवामदक्षिणपार्श्वीयमा॥तो

ग्निरूपायनमः॥तदुपरिनाभिपर्यंतंबधरूपचिरायेमूलप्रकृत्ये
नमः॥तदुपरिहृदयपर्यंतंत्रारश्चंद्रप्रभायेपंकजद्वयाधारिण्ये आ
धारशक्त्येनमः॥तदुपर्युपरिहृदयएनरूर्मीयनमः॥अनंतायनमः
वराहायनमः॥पृथिव्येनमः॥अमृतार्णवायनमः॥रत्नद्वीपाय॰
स्वर्णपर्वताय॰कल्पकोद्यानाय॰मणिमयमहादिव्यभूमिकायेन॰
मणिमंडपाय॰कल्पवृक्षाय॰रत्नवेदिकायेनमः॥रत्नसिंहासना
य॰ततःसिंहासनस्यपादगात्ररूपत्वेनदक्षांसेरक्तवर्णायवृषभ
रूपायधर्मायेति॰वामांसेश्यामवर्णायसिंधुरूपायज्ञानायनमः॥

वामोरौहरिद्रावर्णीयभूतरूपायवैराग्यायनमः॥दक्षिणोरौइंद्रनीलवर्णी
यगजरूपायऐश्वर्यायएतेपादरूपिणः॥ततोमध्येगात्रलेनस्वदियोग
पीठस्यमुखेशूद्ररूपायकृष्णवर्णीयरवयेधर्मायनमः॥
वामपार्श्वेअश्वरूपायअंधकारवर्णीयअज्ञानायनमः॥नाभौउन्मन
पिशाचरूपायअवैराग्यायनमः॥दक्षिणपार्श्वेस्त्रीरूपायमुक्तके
शायनग्नायअनैश्वर्यायनमः॥ततोमध्येहत्कमलेरोषायनमः॥प
शवेनमः॥तत्रआनंदकंदायनमः॥संविन्नालायनमः॥सर्वतत्वा
त्मनेपद्मायनमः अष्टपत्रायपत्रेभ्योनमः विकारमयकेसरेभ्यो

नमःपंचाशद्बीजाढ्यकर्णिकाय॰सर्वतत्वात्मनेपद्मायनमः अ
ष्टपत्रायपत्रेभ्योनमः विकारमयकेसरेभ्योनमःपंचाशद्बीजाढ्य
कर्णिकाय॰तस्यांअर्कमंडलायउंसोममंडलायमंवह्निमंडला
यनमःसत्वायरंरजसेनमःतंतमसेनमः॥अंजात्मनेनमः अंअं
तरात्मनेनमःपंपरमात्मनेनमः॥संज्ञानात्मने॰इतिविन्यस्यहृदय
हृल्लेखापत्रीमंत्रंविभावयेत्॥तद्यथा॥रांरक्तवीर्यचंद्रमंडलायनु
कोणविलसद्रुद्रादिसत्कर्णिकंतत्वस्त्रेस्वरयुग्मकेसदृतं
वर्णैस्त्रिवर्णीममोः॥चूडामंत्रंतुरीयंचेतिमिदंस्मृत्वाकोणेतारं

किनंगायत्र्याः कथितं महः प्रभृतिभिर्यंतुदीक्षांकितं॥१॥अस्या
र्थः रक्तेत्रिकोण हृहिः कुरागनुकोणेषुत्रिकोणेषुनिलसंतोभ्र
रादयः भूः भुवस्वः व्याहृतिबीजंत्रयंभावयेदित्यर्थः॥वस्वस्रो
षुअष्टकोणेषुप्रतिदलेस्वरयुग्मसंपुटितमनोगायत्रीमंत्र
स्यत्रिवर्णनदादिकंलिखितंदीप्तवर्णंभावयित्वा-चूडामंत्रःआ
कोज्योतीरसरस्वादिशिरोमंत्रः तेनतुरीयः-चतुर्थकारः परोर
जसइतिअनेनचरोहितंस्याकोणेकभूपरेषुचतुष्कोणेषुतारा ३१
दिमहत्प्रभृतिभिः अंकितंकरादिवर्णैः क्षांतंबहिर्वेष्टितंभा

वयित्वामध्येत्रिकोणस्यसूर्यमंडलाकारं।तेजोरूपंनतुलंकोटिमा
र्तंडतेजोमयंचिंतयित्वा॥तत्रवक्ष्यमाणध्यानरूपांश्रीसावित्रीं
ध्यायेत्॥सायथा॥रक्तारविंदमहेमनीलधवलछायैर्मुखैस्त्री
क्षणैरुक्तामिंदुनिबद्धरत्नमुकुटांतत्वार्थवर्णात्मिकां॥गायत्री
वरदाभयांकुशकशांशुभ्रंकपालंगुणं॥शंखंचक्रमथारविंद
युगलंहस्तैर्वहंतीभजे॥१॥अथागतोध्यानं॥हृदयकमलेयोग
पीठेक्षीरोदासागरांतरालेमणिमयद्वीपेस्वर्णमयपर्वतेस्वर्णप्रका
रवेष्टितेनंदनोद्यानोचिंतामणिमंडपेरत्नसिंहासनेचक्रराजोप

३२ बिंबे कोटिसूर्यतुल्यतेजोमये बालार्कायुतप्रभां त्रिनेत्रां पंचवक्त्रां दशभुजां
वरदाभयांकुशाग्नितोदपानजपमालांखड्गचक्राब्जकुम्भधरां दिव्यां
वरांदिव्यगंधानुलेपनीं दिव्यालंकारभूषितां कोटिकंदर्पलावण्यां
लसन्नीं प्रहसितमुखीं वरविंशतिवरणदेवतासंविधानगणां
परिवारांहृदयसरोजासनीं भीष्टदां सर्वपापहंत्रीं श्रीसावित्रीं चिं
तयामि चिंतयेन्नेवमात्मानं जपकुर्यात्समाहितः॥ ध्यानमेवं पूज
यित्वांबां विश्वदेः साधको नमः॥१॥ एवं स्थैर्येणप्रथमंध्यात्वा त्रि ३२
रसिपुष्पंदत्वाउत्तरेहृदयकमले योगपीठं चिंतयित्वा तदुपरि

सावित्रीध्यात्वात्मानसोपचारैःयथोक्तप्रकारेणगुरूपदिष्टेनपूजयि
त्वाप्रसन्नाहृदयसायनं॥यथाशक्तिमूलविद्यांसावित्रीं मनसाज
पित्वातज्जपंदेव्याहस्तेननिवेद्यआत्मपूजापुरःसरंमानसयागं कुर्यी
त्॥तदुक्तं विश्वामित्रसंहितायां॥प्राणायामंत्रयं कृत्वाप्रविश्यहृदयां
बुजं॥देवतांतत्रसंचिंत्यमनसाराधयेत्ततःयेनक्रमेणयेमंत्रैःइष्टैर्नाना
विधैःशुभैःतेनक्रमेणतैरेवमानसोयागईरितः॥वाग्योऽयंमंत्रम
नसेनमनुस्मरेत्॥मुद्रानदर्शयेत्तत्रहृत्पद्माभानयेत्ततः॥अत्रेदा
नींनोक्तंहृदयेमानसार्चयेत्॥आराध्यमनसाभक्त्यासाधकी

जपमाचरेत्॥हृदयांबुजमध्येतिसंबंधाः॥हृदयांबुजमित्यत्रवी
ह्यवस्थासनेस्वयमुपविश्य॥तत्रैवदेवतासनेयोगपीठत्वेनमनसै
वकल्पयित्वा॥तेनाध्यासनादिकर्मकर्तापमानसमेनहृदयस्था
नकायमित्यर्थः॥तथानारसिंहसंहितायां॥ध्यात्वात्मानंजेत्सी
ढंन्यासमार्गेणमंत्रवित्॥तस्मिन्पीठेऽथतांदेवींगायत्रीमुक्तवि
ग्रहां॥ध्यात्वायजेच्चंदनाद्यैर्मांनैवेद्यभोजनांतिकैः॥भोजनावसरे
मंत्रीवैश्वदेवंसमाचरेत्॥मूलाधारगतेकुंडेदेवताग्निसमुज्ज्वले॥
धर्माधर्मेधितेन्यस्यमूलमंत्रपुरःसरं॥अमुंजुहोमिस्वाहेतिप्र

त्येकंजुहुयात्सुधीः॥हिंसानास्तिक्यमज्ञानमदयादंभकेतवे॥
आत्मतत्त्वमनृतंचदारिद्र्यंशोकमत्सरे॥अहंतासत्यपैशून्यंकाम
क्रोधमदरुजं॥पक्षमोक्षामितारभयंनिद्रांसुरेश्वरं॥अध्यैर्ष्य
दुष्टसंतापंनीचसंगत्यविग्रहं॥आत्मरंभावमित्यष्टावित्यात्मा
ऽहुतिमिर्जुहुयात्॥मनएवस्रुचःप्रोक्तस्रुषुम्नास्रुगुदीरता॥अथ॥
अंतर्निरंधनिबंधनमेधमानं॥मोहांधकारपरिपंथिनिसंवि
दग्नौ॥कल्मिश्चिदज्ञतमरीचिकात्राभमौर्वेश्रंजुहोमिवसु
धादिशिवानसनं॥१॥इत्यनेनैकविंशत्याहुतीर्दद्यात्॥तदनंतरम

योभूत्वाजपेदिष्टानुरूपतः॥तज्जपंसर्वदुःखघ्नोसाधिभैनस.
मर्पयेत्॥ततस्तुदेवतारूपोभूत्वातिष्ठेत्कुयात्क्षणं॥इत्येवमातर
यागंकृत्वात्मपूजनंचरेत्॥अथात्मपूजा॥तत्रसजलेनपवि
त्रेणगायत्रीमु-आर्ममूलाधारेभ्रूमध्येचसंप्रोक्ष्यमूलादिब्रह्म
रंध्रांतंदशत्रणवसंपुटां-तेनुहृदयेऽष्टदोगायत्रीमु-च्चार्यो
रुंडदंडायमानतेजोरूपांविभाव्यततेजोभिरेकीभूतमानंदघ
नंस्वमंत्रदेवतानामभेदेनस्मरन्पंचीकृतंस्वशरीरंनिर्मलंम
त्वागंधपुष्पधूपदीपरंवुदंभवात्मानंपूजयेत्॥ळंकारैर्भूष

यित्वायोगपीठंविचिंत्यतत्रमंत्रैस्तत्तन्नंसंप्रोक्ष्यउत्तमांगेहृदयेम
लाधारेपद्मेसर्वांगो-चेतिपंचस्थानेषुपंचकृत्यःपुष्पांजलित्रयस
ज्जितरूपमात्मानंध्यात्वाक्षमालयाहृत्पद्माक्षादिमात्रमंत्रमाला
नाष्टोत्तरशतमष्टोत्तरशतिवारंजप्त्वापुनःप्राणायामत्रयपूर्वकम
ष्टादिकरषडंगंकृत्वादेव्याहस्तेजपंतेजोमयंनिवेदयेत्॥ॐनुस्वात्मिनु,
स्वरूपेश्रीत्रिपुरेहृणास्मत्कृतंजपं॥सिसिर्भवतुमेदेवीत्वत्प्रसादात्कर
स्थिता॥१॥इत्यनेनमंत्रेणजपंनिवेद्य-चतुर्दिक्षुद्वाःप्रदक्षीयेत्॥इदं
दृत्वाद्विदलानांद्वारयत्स्मरंस्तथा॥मोदनाद्रावणाख्येनमुद्रेतिपरिकी
र्तितेतिवन्दनाख्यप्रदक्षिणनामानरूपकं॥अथातोदर्शयेन्मुद्राःसमु

रवसंपुटं तथा॥ ततोविततविस्तीर्णौ द्विमुखंत्रिमुखेततः॥ चतुर्मुखं
पंचममुखषण्मुखाधोमुखेततः॥ व्यापकोजलिकाख्यचन्द्राकृतदन
तरं॥ यमपाशस्तुगंथितस्यात्सम्मुखोमुखं॥ विलंबीमुष्टिकोमीन
स्ततःकूर्मवराहकौ॥ सिंहाक्रांतंमहाक्रांततोमुद्गरपल्लवौ॥ एतान्मुद्राः
श्रयेन्निद्राक्रियास्ताःसप्रतिष्ठिताः॥ एतद्दक्षिणमाह॥ सुमुखंसंहतौहस्ता
वुत्तानौकुंचितांगुली॥ संपुटंपार्श्वकौदृश्यौकरावन्योन्यसंहतौ॥ विततंस
हतौहस्तौउत्तानावायतांगुली॥ विस्तीर्णंसंहतौपाणीमिथोकृत्वांगुलिद्व
योः॥ संमुखाःसक्थयोःपार्श्वेकनिष्ठाद्वयोगतः॥ त्रैशांगुलीनावेकत्रैद्वि ३९
मुखंत्रिमुखादयः॥ हस्तोपरिकरद्वंद्वंकाम्यमुद्राविदारदौ॥ तीर्यक्सव्य

ञ्जलानाम्नोपुरुषमंत्रयोस्तथा॥ आकुंचिताग्रोसंयुक्तोन्यक्कृतावधौ
मुखौ॥ उत्तानौतादृशावेवव्यापकांकुचिताकरौ॥ अधोमुखौबद्धमुष्टी
मुक्ताग्रांगुष्ठकौकरौ॥ शकटंनामकथितंयमपाशमतःपरं॥ बद्धमु
ष्टिकयोःकथोपाण्योरुत्तानावामतर्जनी॥ कुंचिताग्रान्यथायुक्तायु
क्ततर्जन्याभृशंवक्रया॥ उत्तानसंधिसंलीनबद्धांगुलिद्वयोकरौ॥ सं
मुखावंहितौदीर्घांगुष्ठाग्रंथितमुच्यते॥ ऊर्ध्वांगुलिर्नामहस्तोतादृ
शादक्षिणेनतु॥ अधोमुखेनसंयुक्तःसन्मुखोमुखमुच्यते॥ उत्तानोत्ता
नकोटिन्यविलंबःकथितःकरौ॥ मुष्टीनान्योन्यसंयुक्तावुत्तानोमुष्टि
कोभवेत्॥ मीनस्तुसंमुखीभूतौवुक्कानामकनिष्ठिके॥ ऊर्ध्वंसं

युक्तवक्त्रायविषांगुलिदलोकरौ॥ अधोमुखः करोवामस्याद्दक्षिणेनतु॥
एषदेशसआक्रांतःकूर्मीनामाभिधीयते॥ ऊर्ध्वमन्येवामभुजकक्षाभ्यामा
श्रयेत्करौ॥ वराहोनाममुद्रेयंकथितामुनिसत्तमैः॥ श्रितौकरौकर्णस
श्रितानायतांगुली॥ सिंहाक्रांतंनामक्रूरामहाक्रांतंचकथ्यते॥ किंचि
दाकुंचितांगौचहस्तौकृत्वातताभवेत्॥ ऊर्ध्वेकिंचिन्नतौपाणीमु
कुरौनामतर्जनीमध्यस्थादक्षिणहस्तेनमुद्राःप्रोक्तामनीषिभिः अधो
भूस्थस्थितोमध्यैपल्लवोदक्षिणःकरः॥ मुद्राणांलक्षणंप्रोक्तंवसि
ष्ठाद्यैर्मुनीश्वरैः॥ अत्रमहासंहितोक्तविरोधः॥ नजातुदृश्येमुद्रा
महाजनसमागमे॥ क्षुभ्यंतिदेवतास्तस्यविफलंचभवेद्ध्रुवं॥ए

तामुद्रान्नजानातिनस्यदेवीनसिध्यति॥ त्रापंतिदेवताःसर्वागाय
त्र्यक्षरसंस्थिताः॥ एवंदर्शयित्वाविश्वामित्रसंहितोक्तंगायत्रीक
वचंजपेत्॥ ॐअस्यश्रीगायत्रीकवचस्तोत्रमंत्रस्यब्रह्मात्रिरृषिः॥
गायत्रीछंदः॥ श्रीगायत्रीदेवता॥ ॐभूरितिबीजं॥ भुवःशक्तिः॥
ॐस्वःकीलकं॥ ममगायत्रीप्रसादसिध्यर्थेजपेविनियोगः॥ ध्या
नं॥ पंचवक्त्रांदशभुजांसूर्यकोटिसमप्रभां॥ सावित्रीब्रह्मवरदां
चंद्रकोटिसुशीतलां॥ त्रिनेत्रांसितवस्त्रांचमुक्ताहारविभा
जितां॥ वराभयांकुशाक्रशापानपात्राक्षमालिकाः॥ शंखच

काञ्चीकाग्र्यंकराभ्यांदधतीपरां॥सितपंकजसंस्थांचहंसारूढांते
स्मरस्मितां॥ध्यात्वैवमानसांभोजेगायत्रीकवचंन्यसेत्॥ॐब्रह्मो
वाच॥विश्वामित्रमहाप्राज्ञगायत्रीकवचंशृणु॥यस्यविज्ञानमात्रे
णत्रैलोक्यंवशमेष्यति॥१॥सावित्रीमेशिरःपातुशिखायां
ममतेश्वरी॥ललाटंब्रह्मदैवत्याभ्रूवौमेपातुवैष्णवी॥२॥कर्णौ
मेपातुरुद्राणीसूर्यासावित्रिकांबिके॥गायत्रीवदनंपातुशार
दादशनच्छदे॥३॥द्विजान्यत्प्रियापातुरसनायांसरस्वती॥सा ३७
ख्यायनीनासिकांमेकपोलौचंद्रहासिनी॥४॥स्नेहौमेपातुरंभा

णीहृदमंहृदयंब्रह्मचारिणी॥उदरंविश्वभोक्त्रीचनाभौपा
तुकरप्रिया॥५॥चिबुकंवेदगर्भाचकंठपार्श्वंनाशिनी॥अ
ग्निवर्णाभुजौपातुकरौसत्यार्थसाधिनी॥६॥जघानंनारसिंही
चपक्षंब्रह्मोऽधारिणी॥पार्श्वौमेपातुपद्माक्षीगुह्यंगोश्रीकाम
नु॥७॥ऊर्वीरोकारूपाचजानोःसंधात्मिकानतु॥जंघयोःपा
तुअक्षोभ्याकुल्फयोर्ब्रह्मशीर्षका॥८॥सर्वांपदद्वंयंपातुचंद्र
वादांगुलीषुच॥सर्वांगंवेदजननीपातुमेसर्वदानघा॥९॥इत्ये
तत्कवचंब्रह्मन्गायत्र्याःसर्वपावनं॥पुण्यंपवित्रंपापघ्नंस
र्वरोगनिवारणं॥१०॥त्रिसंध्यंयःपठेद्विद्वान्सर्वत्रकामानवा

नुयात्॥सर्वशास्त्रार्थतत्त्वज्ञःसभवेद्विद्वसत्तमः॥१७॥सर्वयज्ञफ
लंप्राप्यब्रह्मांतेसमवाप्नुयात्॥प्रणवेनजपमात्रेणपुरुषार्थचतु
र्विधान्॥१२॥इतिश्रीविश्वामित्रसंहितायांब्रह्मकोशिसंवादेगाय
त्रीकवचंसंपूर्णं॥श्रीपरमेश्वरःप्रीयतां॥एवंकवचंजप्त्वागा
यत्रीचतुर्थपादमंत्रंजपेत्॥अस्यश्रीचतुर्थपादस्यविमलऋ
षिः॥परब्रह्मपरमात्मादेवतागायत्रीछंदः॥चतुर्थपादगायत्री
जपेत्॥ॐपरंहृदयेरजसेशिरसिअसावादोशिखायां॥ॐ
पदारजसेसावदोंअस्त्रेइतिकरषडंगन्यासंकृत्वा॥ॐभू ३८
र्भुवःपरोरजसेसावदों॥सर्वांगे॥ध्यानं॥दराहस्तापंच

वक्त्रांकोटिसूर्यसमप्रभां॥पद्महस्तांवेदगर्भब्रह्मरूपांहृदिस्मरे
त्॥१॥इतिध्यात्वा॥मानसोपचारैःपूजयित्वा॥पुनरंचतुर्थपाद
जपंकृत्वा॥गायत्रीतर्पणंकृत्वा॥तत्रादौविसर्जनेमुद्राःप्रदर्शयेत्॥
स्फटिकस्नानशूर्पाश्वयोनिःकूर्मोथपंकजं॥लिंगंनिर्याणमुद्रांच
जपांतेचप्रदर्शयेत्॥इतिदर्शयित्वा॥वसिष्ठशापविमोचनंकु
र्यात्॥अस्यश्रीवसिष्ठशापविमोचनमंत्रस्य॥विश्वामित्रऋषिः॥
सूर्योदेवता॥गायत्रीछंदः॥वसिष्ठशापविमोचनार्थेजपेविनि
योगः॥अहोदेवीमहोदेवीदिव्येसंध्यिसरस्वती॥अजरेअमरेमात
ब्रह्मयोनेनमोस्तुते॥वसिष्ठशापात्मुक्तोभवतु॥ततः॥आचम्य॥

गायत्रीतर्पणं कुर्यात्॥ ॐ भूर्भुवस्वः पुरुषं सांगयजुः सामसं इतिहासांतगीतसपि
तारमावाहयामि॥ इत्यावाह्यातर्पणं कुर्यात्॥ ॐ भूः पुरुषमृग्वेदंतर्पया
मि॥ भुवः पुरुषमृग्वेदंतर्पयामि॥ ॐ भुवः पुरुषं यजुर्वेदंतर्पयामि॥ स्वः
पुरुषं सामवेदंतर्पयामि॥ ॐ महः पुरुषमाथर्ववेदंतर्पयामि॥ ॐ जनः पुरुषमि
तिहासंपुराणंतर्पयामि॥ ॐ तपः पुरुषमर्वीगयंतर्पयामि॥ ॐ सत्यंपुरुषस
र्वलोकंतर्पयामि॥ ॐ भूर्भुवस्वः पुरुषमृग्यजुः सामसं इतिहासांतर्गतंतर्प०॥ भूः
एकपदागायत्रीतर्पयामि॥ भुवः द्विपदागायत्रीतर्पयामि॥ ॐ स्वः त्रिपदागा
यत्रीत० ॐ भूर्भुवस्वः चतुष्पदागायत्रीतर्पयामि॥ ॐ ऊर्जसंतर्पया० गाय
त्रीतर्पयामि॥ सावित्रीत० सावित्रीत० सरस्वतीत० वेदमातरंत० पृथि

वीतर्पया० जयांत० कौशिकीतर्पि० सांकृतिंत० सर्वोपराजितांत० सहस्र
मूर्तिंतर्पयामि॥ अनंतमूर्तिंत० २४॥ एतैर्मंत्रैश्च योनित्यं चतुर्विंशतिभि
र्द्विजः॥ स्कृतर्पयतिगायत्रीसंध्याफलमाप्नुयात्॥ इतिगायत्रीतर्पणं॥
अथजपलक्षणंत्रीनकः॥ गायत्रीं संस्मरेद्धीमान् हृदिनासूर्यमंडले॥
कृत्योक्तलक्षणेनैवध्यात्वाभ्यर्चततोजपेत्॥ प्रातःस्निष्ठन् जपेद्देवीं सा
यंसंध्योपविशंश्च॥ उपविशंश्चमध्याह्ने जपेत्कर्म समारभेत्॥ विधिज्ञः
प्रातर्मध्याह्नयोःस्निष्ठन्गायत्रीजपमाचरेत्॥ ऊर्ध्वजानुस्तु सायाह्ने ध्या
नालोकनतत्परः॥ पूर्वसंध्याजपास्निष्ठन्सावित्रीकमदर्शनात्॥ पश्चिमा
न्तुसमासीनः सम्यङ्नक्षत्रदर्शनात्॥ अथांगुल्याजपलक्षणं॥ अंगुष्ठे

यजपं कुर्यान्नतु कापि कदाचन॥ लक्षाद्यैः सर्वसिध्यैरतोसारतोसारं
प्रकल्पयेत्॥ अथ कल्पसारं लक्षमात्रया राजपं कुर्यात्॥ ततः गायत्र्युच्चार
धर्मः कथ्यते॥ प्रणवंपूर्वमुच्चार्य भूर्भुवः स्वः ततः परं॥ गायत्री प्रणवं चां
तेजपेत्पंडुदाहृता॥ वाचिकाख्यउपांशुश्चमानसस्तिविधः स्मृतः॥ त्रया
णांजपयज्ञानां श्रेष्ठः स्यादुत्तरोत्तरः॥ यदुच्चैर्नीचखरितैः स्वरैः
व्यक्षरैः॥ मंत्रमुच्चारयेद्वाचाजपयज्ञः सवाचकः॥ स्वानैरुच्चारयेन्मं
त्रंदनोद्वोप्रचालयेत्॥ अपरैरुच्यतेः किंचित्सउपांशुजपः स्म
तः॥ विधायवाक्षरश्रेण्यावर्णाद्वर्णंपरात्परं॥ ध्यात्वार्थंचित्तनोभ्रमः
कथ्यतेमानसोजपः॥ वा॥ चकल्पुरुषः प्रोक्तः उपांशुः स्वात्मुच्यते॥

सहस्रंमानसः प्रोक्तो मन्त्रिभरुत्तारदैः॥ ब्रह्मचारीगृहस्थश्च स्वा
त्मलक्षोत्तरंजपेत्॥ वानप्रस्थोयतिश्चैवसहस्रादधिकंजपेत्॥ अलोत्तर
शतंनित्यंअष्टाविंशतिमेववा॥ विधानाद्वाकंवापित्रिकालेसंजपेद्बु
धः॥ श्रीप्रदोवेदशीर्षजापत्रीद्वासंख्यया॥ अष्टाविंशत्यनुध्यायेमंत्रं
हृदिनेजपेत्॥ जपांतेसप्तव्याहृत्या संविधाय॥ ध्यात्वादेव्याहस्तेनु
तिगुह्यमंत्रेणजपंनिवेदयेत्॥ ॐगुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतं
जपं॥ सिद्धिर्भवतुमेदेवीगायत्रीपरमेश्वरी॥ इति॥ अथसंध्यापा स
नो॥ मित्रोजमानितिनवर्चस्सूक्तं॥ तद्दोदिनोद्वयेका॥ गणानांत्वेमे
का॥ जातवेदसेत्रयंवकं॥ ॐ जातवेदसेत्रयंबकं॥ ॐ नमप्राच्यैदि

इति याज्ञवल्क्यः॥ संध्यायै नमः॥ गायत्र्यै नमः॥ सावित्र्यै नमः॥ सरस्वत्यै नमः॥ ब्रह्मणे नमः॥ विष्णवे नमः॥ श्रीनाथाय नमः॥ आत्मने नमः॥ परमात्मने नमः॥ अंतरात्मने नमः॥ सर्वभूतात्मने नमः॥ स्वो नाथ विधिभवेत्पेका॥ मानस्तोके तिसमानीव आकृतिः॥ अतो देवा नवीः॥ भद्रं नो अपिवातय मनः॥ तच्छंयोः॥ भूरादिव्याहृतिभूर्भुवःस्वरिति जप्त्वा॥ प्रवरान्युच्चार्य अमुकशर्माहं भो अभिवादयामि॥ ॐ नमोमह्यः॥ ॐ गुरुभ्यो नमः॥ आत्मपादौ भूमिं च स्पृष्ट्वा॥ सावित्रीं च तथा स्मर्त्वा द्विजान्प्यभिवादयेत्॥ ज्येष्ठं वा थकनिष्ठं वा संध्यांते चाभिवादयेत्॥ वर्जयेत्सूकनं शिष्यो हिनंडुहेतुः पतिं॥ नित्यं वेदमधीतारं तथा चाध्यापकं द्विजं॥ अवधीतो नमस्कुर्यात्ये ४१
ष्ठावि कनीमसं॥ इतिप्रातः संध्याविधिः॥ अथमध्यान्हसंध्याविधिः॥

कुर्वीमाध्याह्निकी संध्यान्हयतादनंतरं॥ संगवादूर्ध्वमेवा कुर्नेद्वेदविगर्हितां॥ आदौद्विराचम्यप्राणानायम्यपूर्ववत्॥ मम उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं माध्यान्हसंध्यामुपासिष्ये॥ आपोहिष्ठादिमार्जनांते आपः पुनंतिमंत्रेणाचमनं विधाय॥ सकृदाचम्य आपोहिष्ठेत्यादिनार्चनमार्जनं॥ सूतंजेतित्रेणाघमर्षणं॥ सकृदाचम्य तुमध्यान्हे प्रारब्धे हंसइत्यृचा॥ त्रिर्वीक्षणमंत्रेणगायत्र्याचेतिकेचन॥ ॐ उतायांतं॥ इत्यृचा॥ पूर्ववत्॥ संध्यातर्पणं ऋनः पुनंतपिष्यामि॥ यजुर्वेदतर्पणं॥ मंडलं॥ तद्रूपं अंतरात्मनः॥ सांकेतिकः संध्याः पुनंतिमरौ त्रीजप सं॥ निष्कर्षं॥ सर्वमंत्राधिपतिं॥ ॐ भूर्भुवः॥ गायत्रीतर्पणेविशेषोना

स्ति॥ द्विराचम्य॥ उदुत्यमिति नवर्चं सूक्तं॥ चित्रं देवानां अ ऊर्ध्वं सूक्तं॥ ६
सावित्रं हंसऋतिरूपं वदेत्॥ इतिमाध्यान्हसंध्याविधिः॥ अथसायंसं
ध्या॥ आचम्य प्राणानायम्य प्रार्जयित्वा॥ अग्निश्चेति मंत्रोदकं प्राश्य म
ूर्धन्यमार्जनं कृत्वा॥ घमर्षणं विधाय॥ अर्घोदानंराओचेदृतेणा पस
श्चात्तीर्थं कुर्यात्॥ ॐ स्वःपुरुषं सामवेदं मंडलं विष्णुरूपिणं परमा
त्मानं सरस्वतीं वेदमातरं सावित्रीं संध्यां रुद्रांशं वैष्णवीं युवसेनिमुच्चं
सर्वतीर्थसिद्धिकरीं॥ सर्वमंत्राधिपतिं ॐ भूर्भुवस्वः पुरुषं तर्पयामि॥ गा
यत्रीतर्पणमेवं पूर्ववत्॥ उपस्थानं॥ यच्छिन्नेति देवर्षिसूक्तं॥ इमंमे
वरुण॥ तत्त्वायामि ब्रह्मणा वंदमानः॥ त्रयमद्येंद्र॥ त्रीणिपूर्ववत्॥ इ

तिसायंसंध्याविधिः॥ इत्येवंसंध्यात्रयकालेसंध्यादिकं कृत्वादेवतात्मा सू
र्यं विहरेत्॥ इतिप्रसंगात्तः मध्यान्हसंध्यासायंसंध्याविधिः॥ एवंयथोक्त
चित्तकालेकर्तुमशक्तश्चेन्मनसासूर्यमंडलंध्यायन्॥ मनसैवतत्तत्काले॥
ॐ ऐंह्रींश्रींपरमदुष्करकर्मछेदिनीअघोरेअपरदेविघेघायनैर्ऋत्यरूप
सहस्रपरिवारैर्निजातगणैस्सूश्रींह्रींऐंॐइतिजप्त्वासंध्याकर्मसिद्धि
र्भवतीतिप्रसंगिकः सूत्रसंरचनात्॥ अथप्रातःसंध्यावंदनांतरंनंतरंपुर
श्चरणकृत्॥ नद्यादौस्थले॥ ततःपरमन्यैर्वनद्यादौस्वर्चयेदद्यात्॥ दिति
कस्यचिन्मतं॥ पूजाप्रदेशंगत्वा॥ दद्यादिति वसिष्ठसंहितायां॥ अग्ने व क्ष
ता॥ ततोमूलेनाभिमंत्रितेजलेनाचम्य गुरुदिक्प्रतिग्रहान्प्रणम्य॥ इति

संतर्पितं स्यात्सदैवतं सुदृढव्रतः॥ मौनीदेवीं हृदिध्यायन्मूलेनवापिसंजपेत्
जपन्बुधस्यपदहृज्जीयामायागस्यमंडलंपरिमितं॥ पूजाप्रदेशमागत्यद
त्वार्घ्यंनिवस्थेत्॥गंधपुष्पादिभिःसम्पग्दारपूजांसमाचरेत्॥ततश्च
तत्रगत्वाप्रागणेकंदेशेस्थित्वामूलमंत्राभिमंत्रितेनजलेप्राङ्मुखोवा
प्युदङ्मुखोमौनीआजानुपादौमणिबंधपर्यंतंकरौचप्रक्षाल्यादिराचमे
त्॥प्राणत्यागणगोमयप्रलिप्तभूमौसोधमध्येवासूर्यंध्यायेत्॥त
द्यथा॥प्राङ्मुखेनःकरवासनेफपविष्टोगुरोर्विंदनपूर्वकं॥अष्टाक्षर
सूर्यमंत्रेणप्राणायामत्रयंकुर्यात्॥ॐघृणिःसूर्यआदित्योद्व्यक्षर
रमंत्रःॐअस्यश्रीसौराक्षरमंत्रस्यब्रह्मा ऋषिः॥आदित्योदेवता॥गा

यत्रीछंदः॥सूर्यार्घ्यप्रदानेविनियोगः॥ॐगायत्रीमंत्रस्यसव्यादिकं
स्वस्वीयैकमात्मानंध्यात्वाग्निकोणगर्भितषट्कोणरक्तात्मकं मं
डलंनिर्मायतत्रॐब्रह्मविष्णुमहेशात्मकायसौरायपीठायहृति
गायत्र्यास्त्रमंत्रेणतास्त्रपात्रंप्रक्षाल्यस्वापयित्वासूर्यमंत्रेणशुभोद
कैःपूरयित्वासूर्यमंत्रेणैवकुंकुमरोचनारक्तचंदनादिकरवीरजपा
दिपुष्पंवीक्षतंनिक्षिप्य॥भानुनैवेसंकल्पसूर्यमंत्रंलिखित्वातदुप
रिसूर्यंध्यात्वावाहनादिकंकृत्वासूर्यमंत्रमुच्चार्यसांगायश्रीसूर्यीय
मूर्तिंनमस्कृत्यसोमाद्यष्टोत्तरशतंश्रद्धादिमंडलाकारणसंकल्पक
रणपात्रमाछाद्यसूर्यमंत्रमष्टोत्तरशतंवादशवारंवाजपित्वापुनः

पुनः सूर्यं संपूज्य ॥ गंधादिभिर्वेद्य सूर्यमंडलदेवीं धात्रीं जानुभ्यामध
नीगतआमलकमध्यपात्रमुत्थाप्योत्तिष्ठसावरणोरौरौस्वेनहृदि
निधाय ॐ ह्रीं सः घृणिः सूर्यआदित्योग्रहनक्षत्रपरिवृतायभा
तेऽभेरवायप्रकाशशक्तिसहितायद्वादशकलात्मनेगायत्रीरूपी
यसूर्यायर्घ्यंस्वाहाइतिसावित्रीमंत्रपूर्वकंसाग्निदेवतांवुधा
पूरयेत् ॥ ततःपुष्पांजलिंदत्वासूर्यमंत्रस्यजपंकृत्वासमर्प्य ॥
कृत्वानत्वाभानोक्षमस्वेतिसहारमुद्वासिरुद्रेतिसूर्यार्घ्यविधिः ॥
अथासामान्यार्घ्यंकुर्यात् ॥ तद्यथा ॥ देहत्यंगतश्चतुरस्रंवृत्तंत्रि ५८
कोणमंडलंकृत्वा ॥ अस्त्रमंत्रेणतान्यादिपात्रंप्रक्षाल्यसाधारंस्था

पयित्वा ॥ हृदयमंत्रेणशुभोदकेनादायगंगेचेत्यादितीर्थमंत्रेणांकुशमुद्र
यासूर्यमंडलात्तत्रतीर्थमावाह्य ॥ ओंकारमुच्चरन्गंधपुष्पेनिक्षिप्यप्रण
वेनत्रिरभिमंत्र्यधेनुमुद्रांप्रदर्शयेदितिसामान्यार्घ्यविधिः ॥ सर्वत्रस्तत्तद्
द्रव्योदकैरस्त्रमंत्रेणद्वारमभ्युक्ष्यगंधपुष्याक्षतैरंबुपुष्पाभ्यांवाद्वारदेवताः
पूजयेत् ॥ द्वादशेऽर्घ्यस्थापनेवा ॥ ॐविघ्नेशायनमः ॥ महालक्ष्म्यैनमः ॥ स
रस्वत्यैनमः ॥ दक्षिणशिरोवांगणेशायनमः ॥ वामशिरोवांक्षेत्रेशाय
नमः ॥ दक्षिणेगंगायै • वामेयमुनायै • दक्षिणेधात्र्यै • वामेविधात्र्यै • दक्षि
णेशंखनिधये • वामेपद्मनिधये • अधोदेहत्यागअस्त्रदेवतायै • इत्येवंस्त
द्द्वारमारभ्योत्तरद्वारपर्यंतंपूजयित्वातत्तद्वाराधिपामंत्रेणयजेत् ॥ देह

स्यतोऽनंदक्षिणवामक्रमेणरुद्रद्वारे॥ॐब्राह्म्यैनमः माहेश्वर्यै • दक्षि
णद्वारे कौमार्यै • वैष्णवेपश्चिमद्वारे वाराह्यैमाहेंद्राय्यै • उत्तरद्वारे चामुं
डायै • महालक्ष्म्यै • मंडूकाभ्यांमंडूकंत्यक्त्वातत्रैकत्रैवपूजयेदिति
द्वारपूजाविधिः॥ततोविघ्नापसरणंकुर्यात्॥ततोमूलमंत्रमूलम
त्रेणावाहनादिपूजांदिव्यदृष्ट्यादिसाधनं॥ऊर्ध्वौर्ध्वतालत्रयेणांतरिक्ष
गानूर्वामपादपार्ष्णिघातैस्त्रिभिर्भौमांश्चविघ्नानुत्सार्यापसर्पंतुतेऽ
त्येवंप्रत्येकंपठेत्॥इत्येवंत्रिविधान्विघ्नानुत्सार्यद्वारेरंगसंक्षोभ
नूस्वदक्षिणांसेनद्वारस्तंभंस्पृशन्निजवामपादपुरःसरंगृहांतः
प्रविशेत्॥ततःकांस्यघंटास्वनेनद्वारमाछाद्यवामसव्यंगाभ्यां ५५

द्यतोयाभ्यांप्रोक्षयेन्मंडूपंतरमितितोमंडूकांतःपूजांचेद्बहिरुपविश्यनै
र्मंत्रांदिशेत्॥ॐब्रह्मणेनमः वास्तुपुरुषायनमः॥इतिसंपूज्यतौकुंजलिःपठेत्॥
ॐदेविलंबोदरेचंडेपादाक्रांतमभूम्यम॥तन्निःसारयचिंतांमेपादंकृ
त्वानमोस्तुते॥१॥सूर्यःसोमोयमःकालोमहीभूतानिपंच-च॥एतेश्रु
भाशुभस्येहकर्मणोननसाक्षिणः॥२॥इतिमंत्रद्वयंपठित्वाकुंकुमेन
नेनक्रोधदृष्ट्यापार्ष्ण्यूरुमध्येमध्यभागेनिरीक्ष्यरक्तमनाभवेत्॥ततःसि
द्धार्थक्षतकुसुमसचंदनाभिमंत्रितंअस्त्रमंत्रंपठन्गृहमध्येनिक्षिपेत्॥
ॐतीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम॥भैरवायनमस्तुभ्यमनुज्ञां
दातुमर्हसि॥इत्यनेनभैरवायनुत्सार्यहीलाअःफडितिमंत्रेणवेगा

गत्यादेव्याः पूजनं नंनिरीक्षयेत्॥ गायत्र्याभुवमभिमंत्र्यनिरीक्ष्यअस्त्रमं
त्रेणप्रोक्ष्यतेनैवदर्भस्ताडयित्वाकवचमंत्रेणाभ्युक्षयेदिति चतुर्विधः सं
क्षारोभुवः ततश्चंदनागरुगंधाद्यैर्धूपायेन्नमउपांतरमिति॥ततस्त्स्यां
वेदिकायांपुरतोदेव्यासनंस्थंमुस्त्र्यस्यासनभूमौगायत्रीप्रणवंना
विलिख्यातत्रपुष्पंदत्वातदुपरिकुशाजिनांबरैराच्छादितंकहल्लादिहल्लेखा
वाचतुरंगुलमुच्छ्रितंकंवलाद्यन्यतमंमृदासनमास्तीर्यतत्स्पृष्ट्वाभा
वे॥ॐभूःदक्षिणेभुवःपश्चिमेस्वःउत्तरेभूर्भुवःस्वरितिविलिख्यामूलेनप्र
णवेनवाशुभेजलैःसंप्रोक्ष्यतत्रप्रातर्कांभोजंचिंतयित्वापूर्ववत्॥ ५८
मूलाधाराद्विदलितंपद्मासनंसंस्मृत्य॥एवंविलिखेत्यादिअभ्

भक्ष्या ॐआधारशक्तिकमलासनायनमः इत्यनेनगंधपुष्पैःपूजयेदितिआसन
पूजातत्रास्मिन्नासनेप्राक्प्रोक्तदक्षुरोमौनीस्वस्तिकपद्मवीरान्यतर
क्रमभास्थायसमुकायोनिराकुलःसमुपविशेत्॥ततश्चासनस्यानेयकोणे
गंगायैनमः नैर्ऋत्येसरस्वत्यैनमः॥नायव्येदुर्गायैनमः॥ईशानेक्षंक्षेत्रपा
लायनमः ततोदेवस्यवामहस्तेवीणांसव्येस्यानेतुतोरथा॥दीपस्यज्वलितस्यापिसन्नि
धानंप्रकल्प्येत्॥इत्येतेषांएकस्यसमस्तस्यवापिसान्निध्यंपरिकल्प्यध्यायेत्
साधयेत्॥स्थापयेद्दक्षिणेभागेऽजाद्व्याणिचात्मनः॥स्वासितांसुसंपूर्ण
सव्येकुंभंसुशोभनं॥प्रक्षालनायकरयोःपात्रंपूर्वेनिवेशयेत्॥घृतादिज्व
लितान्दीपान्स्थापयेत्स्वदितःशुभान्॥दर्पणंचामरंछत्रंतालंवस्त्रंचपा
दुके॥एवंसामग्निकांविप्रपुरतःसाधनांतरग्निहोत्राग्निसंहिता

यां अन्यानि होमद्रव्याणि यथास्थानं निवेशयेत्॥ इति पूजाद्रव्यासादनं तत
स्तानि नेत्रमंत्रेण विलोक्य रं स्यां हूं फिडिति पात्रं संप्रोक्ष्यौं स्यां हूं फिडिति मंत्रेण
अंगुल्यग्रेण जलं स्पृष्ट्वा॥ औं स्यां हूं फिडिति मंत्रेणात्मानं सर्वं द्रव्यं च प्रोक्षेत्॥ इति पूजा
द्रव्यशुद्धिः॥ ततः कृतांजलिपुटो भूत्वा॥ वामे॥ अं गुरुभ्यो नमः॥ दक्षि
णे गं गणपतये नमः॥ अग्रे श्रीमत्सच्चिदंडात्मने गीतगाय त्रैं नमः इ
ति प्रणम्य करशुद्ध्यादिकं कुर्यात्॥ तद्यथा॥ प्रणवमुच्चार्य गंधपुष्पा
भ्यां करौ संमार्ज्य वामहस्ते निक्षिप्याधः पतत्पुष्पमुत्तरस्यां दिशि
क्षिपेत्॥ ततो अंगुलीषु अंगमंत्रान्न्यसेत्॥ ॐ तत्सवितुर्वरेण्यात्मने हृद ५७
याय नमः॥ इत्यादिषडंगमंत्रान् अंगुष्ठादिकरयोर्विन्यसेत्॥ ततः

कं वसिष्ठसंहितायां॥ आसीनः प्रणवेनाथ परामृश्य करांबुजे॥ अंगुली
कल्पविन्यस्य अंगमंत्रान्ननुक्रमात्॥ अस्त्रमंत्रेणादिग्बंधं कृत्वा सम्य
क्प्रदिक्षु च॥ अग्निप्राकारवत्स्थित्वा ततोमंत्रेण सर्वतः प्राणायामत्र
यं कुर्यान्मंत्रेणप्रणवेन वेति मंत्रयोगायत्रीमंत्रः॥ इति करशुद्धिः॥
ततः पूर्वोक्तमार्गेण प्राणानायम्य देशकालौ स्मृत्वाधिकफ
लार्थी चेत्॥ पुनर्भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासान् स्व
देहे विधाय आत्मपूजापरः सन् संक्षेपतो नर्यागं कृत्वा बा

न्यसेत्समारभेत् सायथा प्राणायामदशकं गायत्रीध्यानोक्तं
स्वैक्येप्रथमंध्यात्वा स्वशिरस्युद्धृत्य पुनरपि हृदयकमले योगा
पीठं चिंतयित्वा तदुपरि देवीं गायत्रीं ध्यात्वा मानसोपचारैर्य
थोक्तप्रकारेण सम्यक् पूजयित्वा प्रसन्नां तां हृदि ध्यायन् ॥
दक्षाधोगायत्रीजघ्यायोनिमुद्रां प्रणम्य वा हृदर्थं
प्रथमं यंत्रोद्धारं कृत्वा यजेत् ॥ तदुक्तं विश्वामित्रसं
हितायां ॥ बिंदुत्रिकोणं षट्कोणं ततो वृत्तत्रं ॥ ॥

यंलिखेत् ॥ चतुरस्रद्वयं बाह्ये चतुर्द्वारोपशोभितं ॥ वेदेपूज्य
गायत्रीं त्रिसंध्याश्चत्रिकोणके ॥ षडंगानि च षट्कोणे पूजयेत्स
यतः सुधीः ॥ अष्टारे पूजयेद्दिक्षु वसूरुद्रानथाश्विनौ ॥ क्रमे
णादित्यदेवाश्च पूर्वादिक्रमशो यजेत् ॥ ततोबाह्ये दिक्कुप
तीश्चतदस्त्राणि ततोयजेत् ॥ इतिस्वर्णादिपात्रे चंदनादि
नास्वर्णादिशलाकयागुरूपदिष्टेनविधिनायथोक्तं यंत्रं
विधायवेदवेचतुर्विंशत्यक्षरांगायत्रीं विलिख्यत्रिको
णेपूरादिव्याहृतिस्वर्णादिपात्रे यंलिखित्वा चतुष्कोणे
महःजनःतपःसत्यमितिचतुष्कं यंलिख्यशिरोमंत्रेणसंवे

ष्ठ॥ॐ नमः सिद्धं अआइईउऊ ऋॠऌॡएऐ ओऔअंअः
कखगघङ चछजझञ टठडढण तथदधन पफबभम य
४९ रलवशषसह क्षत्रज्ञेति सबिंदुकान् मातृवर्णान् पूर्वादिप्रा
क्दक्षिण्येनवीथ्यंतरालत्रयेविलिखेत्॥इतियंत्रनिर्मा
यमूलेनपुष्पंदत्वापुरतस्थापयेदितियंत्रोद्धारः॥अथार्घ्यस्थ
पनंकुर्यात्॥ततःपूर्वोक्तविधिनात्माग्रतःकिंचिद्धामभा
गमवलंब्यसामान्यार्घ्यंस्थापयेत्॥ततःस्ववामभागेच ४९
ऋस्यदक्षिणेसामान्यार्घ्यजलेनैवचतुरस्रषट्कोणवृत्त

त्रिकोणात्मकंमंडलंमस्यमुद्रयानिर्माय ॐश्रीमद्गायत्री
देवतायाअर्घ्यपात्रमंडलायनमः॥इतिपुष्पाक्षतैःसंपूज्य
तस्यांगानिपूजयेत्॥तानियथा॥आग्नेयेॐहृदयायनमः
ॐसेॐशिरसेस्वाहावायव्येशिखायैवषट्॥ईशान्यंकवचाय
हुंमध्येॐनेत्रत्रयायवौषट्पूर्वादिचतुर्दिक्षुॐहःअस्त्रा
यफट्नमइतिमंडलंपूजयित्वामूलविद्यायात्रिपादिकांश
क्तात्मेतन्निधायपूजयेत्॥ॐसंवन्हिमंडलायदशकला
त्मनेश्रीमद्गायत्यार्घ्यपात्रायनमइतिसंपूज्यक्षकारं

धकारांतांविलोमांस्वाहा॥वसानांमातृकांजपन्तदशक्तोके
वलांगायत्रींत्रिरुच्चरेत्॥अर्घ्यपात्रंपूरयेत्॥ततःउंसोम
मंडलायषोडशकलात्मनेश्रीमद्गायत्र्यार्घ्यामृतायनमः
इत्यर्घ्यजलंसंपूजागंगेचेतीर्थमंत्रेणांकुशमुद्रयातत्रतीर्थ
मावाह्य॥शिरसायेवषट्तिगालिनीमुद्रांप्रदर्श्यगंधाष्ट
केनलोहितंपुष्पंनिक्षिप्यधेनुमुद्रयामृतीकृत्यगायत्र्याम
हामुद्रयापरमीकुर्यात्॥तत्रगंधाष्टकमुक्तंवक्ष्यसंहि
तायां॥शिलंगोरोचनेचंद्रमासीकुंकुमकेशरे॥कस्तूरी

२०

२०

शिरमलयंगंधाष्टकमुदाहृतं॥१॥तत्रस्तत्रार्घ्यजलेनिजेष्ट
देवतानांध्यात्वाषडंगन्यासेनसकलीकृत्यअस्त्रमंत्रेणक्षोटि
काभिर्दशदिग्बंधंकुर्यात्॥नेत्रमंत्रेणनिरीक्ष्यशंखमुद्रया
वलोक्ययोनिमुद्रयाद्वीप्यमूलमुच्चार्यश्रीमदाराध्यदेवतायै
गायत्र्येनमइतिगंधपुष्पाक्षतैर्देवींपूजयित्वा॥गंधपुष्पदी
पान्यथाशक्तिनिवेदयेत्॥ततस्तदुपरिमूलमंत्रमुच्चार्य
पित्वा॥मत्स्यमुद्रयाक्षादयेत्॥इतिविशेषार्घ्यविधिः॥त
तःसामान्यार्घ्यजलेविशेषार्घ्यजलंविनिक्षिपेत्॥ततोदक्षि

णेप्रोक्षणीपात्रंस्थापयित्वाजलेनापूर्यतत्रविशेषार्घ्यजलंविं
दुंनिक्षिप्यतेनोदकेनमूलमुच्चार्यआत्मतत्त्वात्मनेनमोविद्या
त्मनेनमःशिवतत्त्वात्मनेनमइत्येभिर्मंत्रैःस्वशरीरंत्रिःप्रो
क्षेत्प्यगायत्र्यात्मानंपूजोपकरणंचाप्युक्षयेदेत्तदर्घ्यपात्रं
पूजापवर्गपर्यंतंतन्नचालयेदित्यर्घ्यस्थापनविधिः॥अथात्म
पूजा॥तत्रप्रोक्षणीजलान्वितपुष्पेणगायत्रीमुच्चार्यमूलादि
ब्रह्मरंध्रांतंगायत्रीमरवंउदंडायमानतेजोरूपांविभाव्यत
त्तेजोभिरेकीभूमानंदम्प गुरुमंत्रदेवतानामभेदेनसावय

वीक्षनंस्वशरीरनिर्मंथ्यत्वागंचपुष्पधूपदीपैरात्मानंपूजयित्वालंकारैर्भू
षयित्वापुनःपीठन्यासक्रमणतत्रस्थानेषुतत्तन्नाममंत्रैःप्रोक्षणीजला
क्षितपुष्पैर्गंधपुष्पैर्वाकेवलपुष्पादिनामंत्रकाधारादिस्थंडिलयागपात्रं
पूजयित्वातत्रगायत्रीध्यात्वागायत्र्यासंपूर्ममगायत्रीमुच्चार्यउत्तमांगेहृ
दयेमूलाधारेपद्मद्वयेसर्वांगेचेतिपंचस्थानेषुपंचधान्यानि॥पुष्पांजलिं
क्षिपेत्॥ततोग्रतोयोगपुरःसरंऋष्यादिन्यासपूर्वकंगायत्रीरूपात्मा
नंध्यायंस्तथाशक्तिजपित्वासमर्पयेत्॥ततोनुज्ञांगृहीत्वाभोगाय
त्रीदेवीत्वाबाह्यपीठेपूजयामीति।अथयोगपीठपूजातत्र
पूर्वनिर्मितयथोक्तगायत्रीयंत्रमध्येऽर्घ्यादेकेनसंप्रोक्ष्य

तत्रैवसर्वाभरणादारभ्यउपायंपरिपूजयेत्।।तद्यथा।।ॐमंड
ूकाधारायनमः।।१कालाग्निरुद्राय।२मूलप्रकृत्यै।३आधार
शक्तये।४कूर्माय।५अनंताय।६वराहाय।पृथिव्यै।अमृतार्णवा
य।रत्नद्वीपाय।स्वर्णपर्वता।कल्पकोद्यानाभ्यन।नानारत्नम
याभूमिकायै।मणिमंडपाय।कल्पवृक्षाय।रत्नवेदिकायै।रत्न
सिंहासनाय।धर्मायै।ज्ञानाय।वैराग्याय।ऐश्वर्यायै।अध
र्मायै।अज्ञानाय।अवैराग्यायै।अनैश्वर्यायै।अशेषाय।
पद्माय।आनंदकंदाय।संविन्नालाय।सर्वतत्वात्मनेयोगपं २२

२१

कजाय।प्रकृतिमयपत्रेभ्यो।विकारमयकेसरेभ्यो।पंचाशद्वर्ण
बीजाढ्यकर्णिकायै।अंद्वादशकलाव्याप्तसूर्यमंडलाय।षोडश
कलाव्याप्तसोममंडलाय।मंदशकलाव्याप्तवह्निमंडलाय।२५
संसत्वाय।रंरजसे।तंतमसे।ओंआत्मने।अंअंतरात्मने।पं
परमात्मने।ह्रींज्ञानात्मने।केसरेषुत्रिकोणेब्रह्माण्ये।रुद्राण्ये
वैष्णव्यै।षट्कोणेषु।हृदयाय।शिरसि।शिखायै।कवचायहुं।
नेत्रत्रयाय।अस्त्रायफट्।इतिअष्टदलेषु।ध्रुवाय।ध्रुवाय।सो
माय।अग्नो।अनिलाय।अनलाय।प्रत्यूषे।प्रभासस्वनमः।।
द्वितीयवृत्तांतराले।।कल्पितेकादशदलेषु।वीरभद्राय।शंभवे।

गिरिशाय॰अजैकपदेशाय॰अहिर्बुध्न्याय॰पिनाकिने॰अप
राजिता॰भुवनाधीश्वराय॰कपालिने॰स्थाणवे॰भगाय॰॥
द्वितीयांतराळेदेव्याग्नादिप्राग्दक्षिण्ये॰धात्रे॰अर्यम्णे॰मि
त्राय॰वरुणाय॰ईशानाय॰भगाय॰इंद्राय॰विवस्वते॰पूष्णे॰प
र्जन्याय॰त्वष्ट्रे॰विष्णवे॰१२मध्येवैदेवगायत्रीमुच्चार्यब्रह्मविष्णु
शिवायगायत्र्यात्मनेसोरायपीठायसनाय॰इतिऊर्ध्वपु
ष्पदत्वातदुपरिश्रीगायत्रीमूर्तयेनमः॥तदुपरिध्यानोक्तांमू
र्तिंपरिकल्प्यपुष्पंनिक्षिपेदितियोगपीठपूजाततःइंद्राद्यष्टौ
लोकपालान्॥तदस्त्राणिप्रपूजयेत्॥अथपाद्यार्घ्याचमनी

यमधुपर्कार्थंपात्रंचतुष्टयंपुरतस्थापयित्वा सामान्यार्घ्यविधिना
श्रीमद्गायत्रीदेवतायाः पाद्यंसंपादयामिनमएवमर्घ्यमित्या
दिमंत्रैस्तत्तद्द्रव्यैश्चपूजयेत्॥तथाचोक्तंविश्वामित्रसंहि
तायां॥पीठपूजाविधानेनपीठंसंपूज्यपूर्ववत्॥पाद्यार्घ्या
चमनीयार्थमधुपर्कार्थमप्युत्तमपात्राण्याधारयुक्तानिस्व
र्णादिरचितानिच॥स्थापयेत्सुरतस्थानिपूजयेत्पात्रवर्त्म
ना॥उशीरंरोचनांचैवपाद्यपात्रेतुकल्पयेत्॥जातीकर्पूर
कंहोकबकुलंतुलसीमालकान्॥चूर्णयित्वायथान्यायंक्षीपेद्दो

चमनीयके॥ कुशाग्राण्यक्षतंचैवयवश्रीहितिलानपि॥आ
ज्यंसिद्धार्थपुष्पाणि क्षिपेदर्घ्यस्यपात्रके॥माक्षिकंशर्करास
र्पिर्दधिक्षीरयुतंतथा॥मधुपर्ककल्पायेचाप्रदद्यादधिपूर्
वकं॥वसिष्ठसंहितायां॥पाद्यंश्यामाकदूर्वाअक्षतंकुशा
लाजतिलस्मृतं॥अर्घ्यंपुष्पाक्षतयवैःकुशाग्रतिलसर्षपैः॥
गंधदूर्वादलैःप्रोक्तंततःश्राचमनीयकं॥जातीफलंचकं
कोलंलवंगसजलंक्षिपेत्॥आज्यंदधिमधून्मिश्रंमधुपर्कः
समीरितः॥तदेतयोर्विकल्पः॥वस्तुदत्तु॥वसिष्ठसंहि

तोन्येवशक्तोतुपूर्वोक्तानिअशक्तोतु॥एकस्मिन्न
थवापात्रेपाद्यादीनिप्रकल्पयेत्॥सर्वोपचारमस्मृत्वा
मभावाद्भावयेद्धियेतिशेषं॥एवमासाद्यपात्राणितत्र
पीठंनिधायच॥मूलेनमूर्तिसंरक्षाप्यध्यात्वादेवीयथा
त्रितं॥आवाह्यपूजयेत्तस्यांपरिवारगणैःसहेति॥ततःपंचा
यतनक्रमीचेत्॥देव्याःपीठस्यनैर्ऋत्यादिकोणचतुष्क
येगणपत्यादिचतुरोदेवादेव्याःपोडशरूपविभूतिरूपा
न्ततत्तत्कोणेषुपथकपथकंपूजयित्वामध्येयंत्रराजेमहा

देवीं गायत्रीं पूजयेत्॥ तथा चोक्तं॥ नैर्ऋत्येगणनाथं च सूर्यं वायव्यकोणके॥ ईशान्येविष्णुमीशानंआग्नेये शक्तिं
५५ पूजयेत्॥ शक्त्यर्थंगायत्र्येवतत आहविश्वामित्रः॥ स वै शक्त्याद्विजातीनांनरेवानचवेक्षवा॥ ब्रह्मविद्यामुपासीतगायत्रींवेदमातरमिति॥ तत्रयष्टरभिमुखवा देवाभिमुखतोदिशः॥ प्राच्यादिरहिताछंदापूजाहोमादिकर्मसु॥ इत्यनुसारात्प्रदक्षिण्येनपूर्वादिकंकल्प ५५
यित्वा॥ नैर्ऋत्यादिकंत्यक्त्वातदारभ्यपूजयेदितिसूत्रं॥ त

यथाप्रथमंनैर्ऋत्येगणपतिंपूजयेत्॥ एकदंतायविद्महेव क्रतुंडायधीमहि॥ तंनोदंतिःप्रचोदयात्॥ वायव्येसूर्य आदित्यायविद्महेसहस्त्रकरायधीमहि॥ तंनोसूर्यःप्रचोदयात्॥ ईशान्येविष्णुंविष्णुगायत्र्यापूजयेत्॥ ॐ नारायणायविद्महेवासुदेवायधीमहि॥ तंनोविष्णुःप्रचोदयात्॥ आग्नेयेशिवं॥ ॐतत्पुरुषायविद्महेमहादेवायधीमहि॥ तंनोरुद्रःप्रचोदयात्॥ इतितत्तत्स्थानेषुपूजयेत्॥ मध्येश्रीदेवीगायत्रींसांगांसपरिवारांसवाहनांसायुं

कारांसायुध्यांब्रह्मविष्णुरुद्रस्वांपूजयेत्॥सायथा॥प्रा
णायामत्रयंकृत्वागायत्र्याऋष्यादिकरषडंगन्यासंवि
धायप्रणवेनकरोध्यांपुष्पांजलिमादाय॥मात्रकांभोज
त्वेनकल्पयित्वा॥पूर्ववद्रूपांभगवतींहृदिध्यात्वामानसो
पचारैर्यथाविधिपूजयित्वा॥तत्रैतेजोरूपांनीत्वातस्मा
त्तेजसोद्भवयासुषुम्नामार्गेणब्रह्मरंध्रात्स्वामनोसा
क्षेणवायुमापूर्यकुंभयित्वादक्षिणनाड्यासूर्यमार्गेणक
रस्थपुष्पांजलौतत्तेजोनिःसार्यदीपाद्दीपांतरगतमिव

निर्गतंनिस्वानंदगुणोदयंदेवीतेजोरूपमुच्चार्यसांगेसपरिवारेभव
तिश्रीमत्सावित्रीब्रह्मवादितिश्रीदेवीगायत्रि॥एतेहिदेहिमहु
स्तेपाद्यकोध्यांदयागसंनिधे॥आसनंकल्पयामिदमास्यतां
दमयाशिवे॥इत्यनेनानीयप्रणवेनब्रह्मरंध्रेनीत्वातस्यांम
तौप्रविश्यपद्ममुद्रांप्रदर्श्यसिंहासनमुद्रांप्रदर्शयेत्॥तत
आवाहनेसंस्थापनसन्निधीकरणसंनिरोधनंसंमुखीक
रणंसकलीकरणावगुंठनामृतीकरणपरमीकरणानी
तिनवसंस्काराञ्छक्तिमुद्राभिःकुर्यात्॥तद्यथा॥गायत्रीमु

ऋष्यादिभगवतीश्रीमद्देवीगायत्रीहृदयादिषडंगदेवतेभ्योनमः
द्वयमूलार्पितांगुष्ठद्वयेनांजल्यधःकरणरूपयावाहन्यामुद्रया
वोत्तिष्ठतिष्ठेत्यधोमुखरूपयासंस्थापयासंस्थापन्या
संस्थाप्य॥२॥हृदयमंत्रमुच्चार्यनमोभगवतिश्रीमद्देवीगायत्री
इहसन्निधेहीत्युक्तांगुष्ठद्वयसंयोगरूपयासंनिधाप
न्यामुद्रयासंनिधीकृत्य॥३॥तथैवसंनिधीरुध्यस्वसंनिरुध्य
स्वइत्यंतरंगुष्ठयासंनिरोधन्यामुद्रयानिरोध्यं॥४॥गायत्री
कवचेमंत्रमुच्चार्यश्रीमद्देवीगायत्रीइहसंमुखीभवइहसं

मुखीभवइत्युक्तानमुष्टियुगुंरूपयासंमुखीकरण्यामुद्र
यासंमुखीकृत्य॥५॥देवतांगेषडंगन्यासेनसकलीकृत्य॥६
परितोभ्रामितोधोमुखतर्जन्येकवामकरमुष्टिरूपयाम
वगुंठथमुद्रया॥श्रीमद्देविगायत्रीइहावगुंठितोभवइहावगु
ठितोभव॥इत्यवगुंठ्य॥७॥नमितिधेनुमुद्रयामृतीकृत्य
॥८॥दशप्रणवसंयुक्तांगायत्रीमुच्चार्यमहामुद्रयापरमी
कुर्यात्॥९॥इतिनवसंस्कारः॥आवाहनादिहीनेनकृताप
जानिरर्थकानिपरीतफलंदद्यादभक्त्यार्चनंयथा॥ततः

गायत्र्यामूर्तेः प्राणप्रतिष्ठांकुर्यात्॥ॐ आं ह्रीं क्रोंअं
यंरंलंवंशंषंसंहंळक्षंहंसः सोहंश्रीसावित्र्याः प्राणाइ
हप्राणाः॥आमित्यादिगायत्र्याजीवइहस्थिताः॥आ
मित्यादिगायत्र्याःसर्वेंद्रियाणि॥आमित्यादिगाय॥
त्र्यावाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाइहागत्यसुखं
चिरंतिष्ठंतुस्वाहा॥इतिजपित्वा॥अमुकीतेपुनरस्मा
सुश्चक्षुःपुनःप्राणमिहनोधेहिभोगं॥ज्योक्पश्येमसुर्यमुदे

देवीमूर्तेर्विसर्जयेत्॥ततोधिकफलार्थीगायत्रीमंत्रसंपुटितेरका
रादिस्तकारांतेपुनःस्तकारादिश्चस्तरांतेपुनरनुलोमेनाकारादिक्ष
क्षकारांतेर्मातृकावर्णैःसबिंदुभिरात्मदेहवदेवीदेहंसव्यापयेत्॥त
द्यथा॥ॐभूर्भुवःस्वःतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनः
प्रचोदयात्॥ॐयंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः कंखंगंघंङं
चंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंक्षंॐळं
ळंहंसंषंशंवंलंरंयंमंभंफंपंनंधंदंथंतंणंटंठंडंढंञंझंजंछंचंङंघंगंखं
कंअः॥ॐऔंओंऔंओंएंऐंऋंॠंऌंॡंईंउंऊंसंऋंॠं
ऌंॡंएंऐंओंऔंओंअः कंखंगंघंङं चंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंब

भंमंयंरंलंवंशंषंसंहंळं।ॐभूर्भुवःस्वःतत्सवितुर्वरेण्यंभर्गोदेवस्यधीम
हि।धियोयोनःप्रचोदयात्।।ॐगायत्रीमुद्रांप्रदर्श्यसन्मार्जनंकुर्यात्।।अनुलोमविलोमेनयोजपेत्सप्रसन्नधीः।।महाफलमवाप्नोतिचतु
र्गुणस्यप्रत्यहं॥पूजाकालेमहादेव्यामूर्तौसन्यापयेसुधीः।।चिंतितार्थ
मवाप्नोतिइमुक्तंब्रह्मणापुरा।।इतिवचनात्।ततःपीठमध्येसर्व
वयवभावेनदेवीध्यायेत्।।योनिमुद्रांप्रदर्शयेत्।।तत्रोंगायत्रीमंत्र
मुच्चार्यश्रीमद्वितागायत्रीपुष्पंप्रतीच्छस्वाहा।।सांगायेसायु ५९
धायेसपरिवारायेसर्वात्मिकायेभगवत्येश्रीसावित्र्यैनमः।।मंत्र
त्रयेणसंपूज्य।।स्वागतान्युपवारान्कुर्यात्।।इतिपुष्पांजलिः।।ततो
तुविश्वामित्रसंहितोक्ताः।।आसनंस्वागतंपाद्यंअर्घ्यमाचमनीय

कं।।मधुपर्कंतथास्नानंवस्त्रालंकारणादिकं।।गंधपुष्पेधूपदीपे
नैवेद्येमुखवासनं।।नमस्कारंषोडशंचकल्पमेदेवताप्रियं।।अ
र्घ्यंपाद्याचमनकंमधुपर्कस्नानवस्त्रके।।गंधपुष्पेधूपदीपोनै
वेद्यंनतिमादरात्।।प्रथातयेसज्जनार्थंदूर्वाक्षतानमुत्रेमात्।।गं
धाद्योनिवेद्यांतापूजापंचोपचारिकी।।सपर्यात्रिविधाःप्रो
क्तास्तासामेकांसमाश्रयेत्।।एवमेवपूजाकल्पेषुज्ञेयं।।तत्र
सर्वसंमतत्वात्षोडशोपचारपूजाक्रमोलिख्यते।।तत्रासनेदक्ष
मेवमूलमुच्चार्यमूलगायत्रीमंत्रः।।भगवतीगायत्रीस्वागतं
तेरतिकुशलंप्रश्नंकृत्वामूलेनस्वागतंमुद्रांप्रदर्श्यमूलेनचतुर्थ्य
तंनामापुष्पांजलिंक्षिपेत्।।श्रीमद्वितापुष्पंप्रतीच्छस्वाहा।।सां

गायैस्वाहाग्र्यायैसपरिवारायैभगवत्यैश्रीमद्देविगायत्र्यैपाद्यंपरिक
ल्पयामिनमः॥इत्यनेनमंत्रेणतत्पाद्यमात्रंपूर्वोक्तसामग्रीकमुख्य
देव्याःपादयोर्दद्यात्॥ततोमूलमुच्चार्यश्रीमत्पुष्पंसांगायैस्व॰
इतिपुष्पांजलिंक्षिपेत्॥ततःपुनरपिपूर्ववत्॥अर्घ्यंदद्यात्॥
शिरसिदद्यात्॥आचमनीयंमुखेदद्यात्॥मधुपर्कंकल्पयो
मिस्वधेतिदद्यात्॥स्नानवस्त्रंदत्वास्नात्वदक्षिणेभागेकल्पितंर
त्नमंडपंनीत्वासिंहासनमुद्राप्रदर्श्यपाद्यमर्घ्यंनिवेद्यम
हाराज्ञाभिषेकवन्मन्त्रैर्देवींस्नापयेत्॥आचमनंकेशो
द्वर्तनंदद्यात्॥एतेअवांतरोपचारागुरुमुखतोज्ञेयाः॥

ततोवस्त्रमितिदात्रयोदश्यंबृहस्पतिदेवतायवाससेनमइतिसं
पूज्यवासोदत्वापरिधायपुनस्तथैवाचमनीयंततोलंकारापूर्व
वद्दद्युश्च॑विद्युदेवतेभ्यालंकारेभ्योनमइतिपूजयित्वामूलं
तेश्री॰पुष्पंत्र॰इत्युत्सृज्ययथास्थानंमुकुटादिभिर्भूषयित्वा
पंचगव्यपुरःसरंपुनर्योगपीठनयेत्॥अत्रसर्वत्रतूपचारद्र
व्याणामप्राप्तावभावेद्विर्येतिशेषं॥ततोवस्त्रमितिधेनुमुद्रयाज
लममृतीकृत्यगायत्रीमुच्चार्यभगवतिदेविगायत्रीनमस्ते
देवदेवेशिसर्वतत्त्वैकरूपरं॥अन्यूनेवेदितंशुद्धप्रकृतिरूप
सुशीतलं॥अमृतानंदसंपूर्णगृहाणजलमुत्तमं॥इत्यनेनमंत्रे

णदेवीमुखेजलंदद्यात्। एवमेवसर्वत्रैव।।जलदानमंत्रः।।ततओं
विष्णुदेवतेभ्योगंधेभ्योनमःइतिसंपूज्यमूलांतेश्री०पुष्पंप्र०सा
गायेगंधंपरिकल्पयामि।।पूर्वोक्तगंधाद्यकेनगंधंदद्यात्।
ततःओंवनस्पतिदेवतायपुष्पाय०पुष्पंपरिकल्पयामि
वौषट्इत्यनेनमुकुटोपरिऊर्ध्वमुखंपुष्पंदद्यात्।।मालांतुदु
र्गादेवतायैमालायैनमः।।इतिसंपूज्यपूर्ववत्दद्यात्।।ततः
स्वरांगारांधूपपात्रमानीयमूलेनाभ्युक्ष्यतत्रागरुश्रीख
ण्डशर्करासंगमचूर्णमधुयुक्तानिक्षिप्यधेनुमुद्रया
मृतीकृत्यगंधर्वदेवतायधूपायनमइतिसंपूज्यपूर्ववत्दद्या

DR BHAU DAJI

त्।ओंगजध्वनिमंत्रमातःस्वाहास्वांगायेधूपंपरिकल्पयामि।।
अस्त्रायफडितिअस्त्रमंत्रेणपूजितांघंटांवामकरेणवादयन्।द
क्षिणेनधूपपात्रमादायधूपंविस्तारयन्।।वनस्पति०इत्यनेन
नीचेधूपंनिवेदयेत्।।देव्यावामतःपुरतोवातत्पात्रंनिदध्यात्।।
ततोवर्त्यकर्पूरगर्भिण्यागरुगर्भिण्यावासुरभिघृतपरितेवा
ज्वाल्यमानंदीपमानीयओंविष्णुदेवतायघृतदीपायनमः।।
वनस्पतिदेवतायैतदन्नपायनमः।।मूलांतेसंबोध्यओंसुप्रका
शोमहादीपःसर्वत्रमितिरापहः।।स्वभास्याभ्यंतरंज्योति

दीपोयंप्रतिगृह्यतां॥इत्यनेनपारावतभ्रमरकारंदेव्यानेत्रादिपादां
तंपुनःपादादिदृष्यंतंत्रिर्देवीदीपंप्रदर्शयेत्॥ततोघृतप्रदीपंदेव्या
दक्षिणेअन्यंवामेरुणपयेत्॥इत्युपचारैर्देवीपूजयित्वापूर्ववत्
मूलाद्युच्चार्यपुष्पांजलिंनिक्षिप्य॥संविन्मयीपदेदेवीगायत्री ६२
ब्रह्मरूपिणी॥आज्ञांप्रयच्छत्वंसावित्रीपरिवारार्चनायमे॥इत्य
नेनदेव्याःशिरसिपुष्पांजलिंनिक्षिप्य॥आज्ञांगृहीत्वावरण
देवताःपूजयेत्॥तत्रादौयंत्रशिरसिॐविश्वामित्रायऋषये ६२
नमः॥ततःत्रिकोणायॐप्रातःसंध्यायैगायत्र्यैनमःमध्यान्ह
संध्यायै॰सावित्र्यै॰सायंसंध्यायै॰सरस्वत्यै॰षट्कोणेषुअं

गदेवताःपूजयेत्॥ॐतत्सवितुर्वरेण्यायनमइतिआग्नेये॥वरेण्यं
विष्णवात्मनेशिरसेस्वाहा॥नैर्ऋत्ये॥भर्गोदेवस्यरुद्रात्मनेशिखायैवष
ट्वायव्ये॥धीमहिसत्यात्मनेकवचायहुंईशान्ये॥धियोयोनःप्रचोदया
त्परब्रह्मात्मनेनेत्रत्रयायवौषट्॥अग्नतःप्रचोदयात्परब्रह्मात्मनेअस्त्रा
यफट्॥पश्चिमतःतुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः॥व
रदाभयधारिण्यःप्रभाननवःस्त्रियः॥इत्यंगदेवताभ्यान्नमः॥गं
पुष्पाक्षतान्वितांजलिनासंपूज्यगायत्रीमुच्चार्यचतुर्वारंपठेत्॥
हिशरणागतवत्सले॥भक्त्यासमर्पयेतुभ्यंमाषमावरणार्चनं॥इ
त्यनेनदेव्यैसमर्पयेदिति एवमुत्तरंत्रापि॥ततःअष्टदलेपूर्ववत्॥

ध्रुवायध्रुवरायइत्यादि द्वितीयावारणं।।ततस्तस्तद्बहिर्वीरभद्रायशं
भवइत्यादि प्रदक्षिण्येनतृतीयं।।३ततश्चाग्नेअर्यम्णेचतुर्थं।इंद्राय
आग्नेयेपंचमं।वज्रायशक्तयेषष्ठं।।एताःसर्वाआवरणदेवताःस्त्री
रूपाभावेत्।।तद्यथा।ओंलांइंद्राय ऐरावतवाहनायदेवाधिप
तयेपीतवर्णायवज्रहस्तायदिव्यस्त्रीरूपायसांगायसपरिवा
रायनमः।।ॐरांअग्नयेमेषवाहनायतेजोधिपतयेकपिलवर्णा
यशक्तिहस्तायदिव्यस्त्रीरूपायसांग०ॐमायमायमहिषावाहना
यप्रेताधिपतयेकृष्णवर्णायदंडहस्तायदिव्यस्त्रीरूपायसां०क्षां
निर्ऋतयेप्रेतवाहनायरक्षोधिपतयेश्यामवर्णायखड्गहस्तायदि ६३

व्यरूपाय०।।ॐवांवरुणायमकरवाहनायजलाधिपतयेश्वेतवर्णा
यपाशहस्तायदिव्य०ॐयांवायवेमृगवाहनायप्राणाधिपतयेधूम्र
वर्णायकुशहस्तायदिव्यरूपाय०ॐसांसोमायतुरंगवाहनायता
राधिपतयेनिधिगदाहस्तायदिव्यस्त्री०ॐहांईशानायवृषभ
वाहनायरुद्राधिपतयेमितवर्णायशूलहस्तायदिव्य०ईईशानयो
र्मध्येऊर्ध्वं।।ॐब्रह्मणेहंसवाहनायप्रजाधिपतयेरक्तवर्णायपद्महं
स्तायदिव्यरूपाय०निर्ऋतिनरूपमध्येअधः।।ॐश्रींशेषायकूर्म
वाहनायनागाधिपतयेचक्रहस्तायस्वर्णवर्णायदिव्य०इतिदिक्ष
तीन्पूजयित्वापंचमावरणं।।वज्रायंशक्तहस्तायदंडायनमः

पाशायअंकुशायगदायै० त्रिशूलायपद्मायचक्रायनमः षडं।वज्रादीनां
ध्यानंयथा।पीतसितश्यामुक्ताकांशनिभृङ्गसिताःसिताः।कोकनद
पाटलाभावज्रायाः परिकीर्तिताः॥इतिध्यात्वागंधपुष्पाक्षतैः
पूजयित्वाषडावरणमितिरथः॥आवरणंपूजयित्वा॥पूर्ववन्मू
लविद्ययागंधपुष्पाक्षतानादायत्रयेणगायत्रीमाराभ्यमूलेनैवपा
द्याचमनीयानिदद्यात्॥तदुक्तंविश्वामित्रसंहितायां।आ
दावंतेचपूजायांननेद्यंमूलविद्यया।पाद्याचमनीयानिदद्या
देतानिदेशिकः।ततोनैवेद्यंनिवेदयेत्॥चर्व्वोष्यलेह्यपेयचतुर्वि
धमंत्रंषट्रसोपेतंस्वर्णादिभाजनस्थंसमानीयपुरतश्चतुष्कोण

६४

६४

६

मंडलोपरिसाधारणंरक्तपद्मंविन्यस्यगायत्र्यानिरीक्ष्यप्रणवेनार्घ्यो
दकेनसंप्रोक्ष्यतेनैवपुष्पंनिक्षिपेत्॥ततोवह्नितिधेनुमुद्रया
मृतीकृत्यगायत्र्यामृतमुद्रयापरमीकुर्यात्॥ततोगायत्रीमु
च्चार्य॥श्रीमत्सवित्रेपुष्पंप्रतिष्ठस्वाहासांगायेसायुधायेस
वाहनायेसपरिवारायेसवीर्यिकायेभगवत्येश्रीमद्गायत्र्यैने
वेद्यंपरिकल्पयामिनमः।इतिमंत्रेणतत्रनैवेद्यंसमर्पयेत्॥
ततःओंअमृतोपस्तरणमसिस्वाहेतिदेव्याहस्तेजलंदद्यात्॥त
तोनामकरेणविकचोत्पलसंनिभंग्रासमुद्रांप्रदर्श्य॥दक्षिण
करेणसमंत्रकंप्राणादिमुद्राःप्रदर्शयेत्॥तद्यथा॥ओंप्राणाय

स्वाहेतिअंगुष्ठतर्जनीमध्यमानाभिः।।ॐ अपानायस्वाहेतिअंगुष्ठमध्य
माभ्यांनाभिः।ॐ व्यानायस्वाहेतिअंगुष्ठनामिकाकनिष्ठिकाभिः।ॐउदा
नायस्वाहेतिअंगुष्ठतर्जनीकनिष्ठिकाभिः।ॐसमानायस्वाहेतिस
र्वाभिः।ततोनैवेद्यमुद्रांप्रदर्शयेत्।प्रभानयावद्धृदयस्पर्शंन्।।
अनामिकांनि।तामनुंजपन्।प्रदर्शयेत्।।ततोमूलविद्यामुच्चा
र्य।ॐभगवतीश्रीमत्सावित्रिसत्यात्रेसत्यहविःसोम्यविधानेक
भक्षणं।।नेवेद्यामितेदेविसानुगायेजुषाणतत्।।इत्यनेन
मंत्रेणतत्रनैवेद्यंदेव्याग्रेपुष्पांजलिंक्षिपेत्।।ततश्चमुद्रां
दर्शयित्वा।।मूलमन्त्रमष्टधाजपित्वामस्यमुद्रयाछादयेत्।।

ततोअस्त्रेणदिग्बंधंविसृजेत्।।ततोभुंजानांगायत्रींध्यायेत्।।अत्रेश्व
र्येःसरसमभिनःरूपविद्येःसमेतादिव्याभिःसेवंतीमितस्तुतिते
र्वीज्यमानांगनाभिः।नर्मक्रीडाप्रहासेनपरान्।संपतीस्वभोक्तृन्
भुंक्तेपात्रेकनकघटितेषड्रसांछ्रीविधात्रीं।।१।।अत्रावसरेपूजां
ग्रहोमंकुर्यात्।।तदुक्तंवसिष्ठसंहितायां।भोजनावसरेमंत्री
वैश्वदेवंसमाचरेत्।।दक्षिणस्यांदिशिंकुंडंचतुराश्रायंहुताशनं॥
संस्कृत्यविधिनाविद्वान्वैश्वदेवंसमाचरेत्।।ततस्संपूज्यगं
ध्यायेद्गायत्रीमुक्तविग्रहं।।तारव्याहृतिभिर्हृल्लेखायुक्तां।
मंत्रमः।।सर्पिषांवापायसेनचतुर्विंशतिसंख्यया।।पश्चाव्या

स्तिभिर्नागंभाघैः पुनरर्चयेत्।। देवतांयोजयेत्सीठंमूर्तौ। वह्नि
विसर्जयेत्।अवशिष्टंहविषाविकिरेत्परितोबलिं।। देवेभ्य पा
र्षदेभ्योगंधपुष्पाक्षतान्वितमितिं।। स्थंडिलंलक्षणमितिनत्रेनानि
यंनैमित्तिकंहोमंस्थंडिलेवासमाचरेत्।। हस्तमात्रेणलक्षुर्वा
वालुकाभिःसुशोभनं।। अंगुलोत्सेधमुत्सृक्कंचलुरस्रंसमंते
ततः।। सर्पिषानातितैलेवाभिघारेवायसेनवा।जुहुयात्साध्य
कःश्रेष्ठःश्रवतुर्विंशतिसंख्यया।। विश्वेषांदेवानामयंवेश्वदेवे
स्विष्टचेनाहोमः।।तस्यैवसर्वेषांतृप्तिहेतुत्वात्।। पूजानंतरं
वानित्यहोमंकुर्यात्।।तदास्वाग्न्येवविसर्जनं।अग्निस्थापना

DR. BHAU DAJI

दिमग्नवस्थते।ततःपार्षदबलिमंत्रः।।येरोद्रारौद्रकर्माणोरौद्रस्था
ननिवासनाः।।योगिन्योपिवस्तथाभूतगणानामपिपार्श्वगे।।
विघ्नभूतास्तथाचान्येदिक्विदिक्ष्वसमाश्रिताः।तेसर्वेतृप्ति
मनसःप्रतिगृह्णंत्विमंबलिं।गंधपुष्पाक्षतान्वितबलिमंत्रंत्रि
क्षुविकिरेत्।।ॐभूतानियानीहवसंतिभूतलेबलिंगृहीत्वाशि
वमस्तुयुक्तं।।अन्यत्रवासंपरिकल्प्ययंतुक्षमंतुतान्यत्रनमो
स्तुतेभ्यः।।इत्यनेनाप्यष्टदिक्षुविकिरेत्।।इतिभूतबलिः।।त
तोगायत्र्याविभूतिविकल्पंकृत्वापुनःपूजास्थानं।।गत्वाशक्त
श्चेद्दिग्नेवासरेआरार्तिकंकुर्यात्।।नोचेदारार्तिकमुद्वा

प्रदर्शयेत्॥ततः सुरक्षां देवीं ध्यात्वा धेनुमुद्रां प्रदर्शयेत्॥ततः
स्वअमृतापिधानमस्त्रबीजेति देवीमुखेजलंदद्यात्॥त
तोर्गनस्त्रारंनेवेद्यंचिदुच्यत्व॥ॐ ह्रींतेजश्चंडैश्वर्येनमइ
तिदेव्युछिष्टभुंजेईशान्यांदद्यात्॥ततोनेवेद्यमुच्छ्रयनेऋत्यां
दिशिधारयेत्॥तत्रछानंशोपयित्वाचदेवीमाचामयेद्धृधः।
तत्रमुखादिप्रक्षालनंदंतधावनंपुनर्मुखप्रक्षालनंहस्तास्य
मार्जनंपुनराचमनंमुखवासनंचदद्यात्॥ततोदेव्यैतां ६
फलंचनिवेदयेत्॥ततःमुखोपविष्टासपरिवारांप्रसंना

देवींध्यायत्॥प्रसंनार्घंदत्वा॥गंधपुष्पधूपदीपैःपूजयेदितिप्रसंन
पूजाविधिः॥अथारार्तिकंदद्यात्॥तत्रयथाविधिविहितमारार्तिकपा
त्रमानीयचक्रमुद्रांप्रदर्श्यवमितिधेनुमुद्रयामृतीकृत्यमूलेनाभ्यम
स्तकमुत्तोत्पमूलमुच्चार्यॐभगवतिश्रीमद्देविगायत्रीसमस्तदेव
ताचक्रमुनिभिर्तगणावृते।आरार्तिकंगृहाणेदंसाविश्रीममसि
द्धये।इत्यनेनघंटावादनपूर्वकंमारावतीत्रमाकारंउद्वैर्नीनिरा
जयेत्॥तत्रछत्रचामरेदर्शयेनानोपभूषणमप्यस्मिन्नवसरेद
द्यात्स्वगीतंचकारयेत्॥ततोमूलेनप्राणायामत्रयंकृत्वाऋ
ष्यादिकरषडंगन्यासपूर्वकंजपमांतामानीयकृत्विसात्रेवाम

हस्तेवारुणपयित्वामूलमंत्रेणार्घ्योदकेनाभ्युक्ष्य ॐ मांमालेमहामा
येसर्वशक्तिस्वरूपिणी। चतुर्वर्गस्त्वयीन्यस्तस्मान्मेसिद्धिदाभव।
इत्यनेनगंधपुष्पाभ्यांसंपूज्यगंधपुष्पंमालेत्वमितिदक्षिणहस्ते
नादायस्वशिरसिगुरुं कंठेमंत्रंहृदयेगायत्रीध्यायन्। हृदयस्थमी
पंमालामानीयदक्षहस्तमध्यांगुलिमध्यपर्वणिसंस्थाप्यतदग्र
तोन्यिगायत्र्योश्चरणकमलेचित्तवृत्तिःसन्। गायत्र्यार्थं
स्मरन्सहस्त्रंत्रिंशतमष्टोत्तरंशतंवाप्रणवव्याहृतिपूर्वकंत
त्सवितुरित्यृचंवालक्षणंचोच्चार्यथानिर्विघ्नंपेत्। करमा
लयावापुरश्चरणेतुअक्षमालयैव। नित्यंजपंकरेत्कुर्यान्नतु

काम्यंकदाचिन्नेतिवसिष्ठसंहितावचनात्। अत्रापिकरमा
लयेतिकश्चिदशास्त्रोज्ञेयमिति। ततःसंख्यापूर्तौपुनःप्रणवमुच्चार्य
जपंसमाप्यॐत्वंमालेसर्वदेवानांप्रीतिदाशुभदासदा। शिवंकुरु
ष्वमेभद्रेयशोवीर्यंचसर्वदा। ॐह्रींसिध्यैनमः। इतिमालांपंचाक्ष
रीशिरसिसंस्थाप्यपुनःप्राणायामत्रयंकृत्वाऋष्यादिकरषडंग
न्यासपूर्वकंसावित्रीध्यात्वास्थानमहस्तेवरसिष्ठमनेदक्षि
णहस्तेवार्घ्योदकेनजपंसमर्पयेत्। गुह्यातिगुह्यगोप्त्रीत्वंग
हाणास्मत्कृतंजपं। सिद्धिर्भवतुमेदेवीगायत्रीत्रिपदेक्षरे। इति
मंत्रेणजपंसमर्प्य। देव्यग्रेपुष्पांजलिंक्षिपेत्। ततःॐह्रींसिध्यै

नमः॥इतिपंचाक्षरमालामंत्रेणपुनर्मानसंपूज्यरहसिजप
येदितिसर्वत्रपुरश्चरणेप्येवमेव॥नासुचंमालिनीचंप्रभावा
देवीमंत्रेजपेन्मुख्यनु॥बलिंदत्वानमस्तेस्तुस्तुत्वादेवीविसर्ज
येत्॥अथतश्चतुरस्रवृत्तत्रिकोणमंडलंकृत्वातत्रगायत्री
ध्यात्वा॥मूलेनपुष्पाक्षतैःसंपूज्यचतुष्पद्गायत्रीमुच्चार्ययथा
लाभान्नादिनादित्यंबलिंदद्यात्॥ततोघंटाचामरादिभिर्देवीं
परितोषयेत्॥गायत्रीकवरस्तोत्रमुदीरयेत्॥तांत्रिकपौरा
णिकवैदिकैःस्तोत्रैर्मूलेनचस्तुत्वापुष्पांजलिंदत्वाष्टांगंप्रणम्य
तत्रतांत्रिकस्तोत्रमुक्तंविश्वामित्रसंहितायां॥अनमस्ते

देविगायत्रीसावित्रीत्रिपदाक्षर॥अजरेअमरेमातस्त्राहिमांभव
सागरात्॥नमस्तेसूर्यसंकाशेसूर्यसावित्रीकेमले॥ब्रह्मवि
ष्णुमहादेवैर्वेदमातर्नमोस्तुते॥अनंतकोटिब्रह्मांडव्यापिनीब्र
ह्मचारिणी॥निस्वादेनेमहामायेपरेशानिनमोस्तुते॥त्वंब्र
ह्मात्वंहरिःसाक्षात्रुद्रस्त्वंगणदेवता॥मित्रस्त्वंवरुणस्त्वं
चत्वमग्निरश्विनौभगः॥४॥पूषार्यमागरुत्साध्वऋषयो
पिमुनीश्वराः॥पितरोनागयक्षाश्चगंधर्वाप्सरसांगणाः॥
रक्षोभूतपिशाचाश्चत्वमेवपरमेश्वरी॥ऋक्सामयजुःसामवि
द्याश्चअथर्वांगिरसानिच॥त्वमेवसर्वशास्त्राणित्वमेवपूर्वसं

हिताः।।पुराणानिचतंत्राणिमहागममतानिच।।७।।त्वमेवपं
चमूलानितत्वानिजगदीश्वरी।।ब्राह्मीसरस्वतीसंध्यातुरी
७० यात्वंमहेश्वरी।।८।।तत्सद्रूपस्वरूपात्वं किंचित्सदसदात्मि
का।।परात्परशिवागायत्रीनमस्तेमातरंदिके।।९।।चंडेकाली
मिवेनित्येकालरात्रिस्वधेवरे।।स्वाहाकारग्निवक्त्रेत्वांनमा
मिजगदीश्वरी।।१०।।नमोनमस्तेगायत्रीसावित्रीत्वांनमा
म्यहं।।सरस्वतिनमस्तुभ्यंतुरीयेब्रह्मरूपिणी।।११।।अपरा ७०
धसहस्राणित्वत्सत्कर्मशतानिच।।मत्तोजातानिदेवेशित्वं
क्षमस्वदिनेदिने।।१२।।ततःकृतांजलिरोम्।।यद्यत्तेभक्ति

मात्रेणपत्रंपुष्पंफलंजलं।।निवेदितंचनेवेद्यंतद्गृह्णानुकंप
या।।आवाहनंनजानामिनजानामिविसर्जनं।।पूजाभागंनजा
नामित्वंगतिःपरमेश्वरी।।संध्याजपंतथाहोमोमोक्षानंतर्पण
कर्मच।।नजानामिनजानामिसावित्रीत्वंगतिर्मम।।३कर्मणा
मनसावाचागायत्रीत्वंगतिर्मम।।अंतश्चारेणभूतानांद्र
ष्टीत्वंपरमेश्वरी।।४।।नाथेयोनिसहस्रेषुयेषुव्रजातिचा
म्यहं।।तेषुतेष्वच्युताभक्तिरच्युतेस्तुसदात्वयि।।५देविदा
त्रीचभोक्त्रीचदेविसर्वमिदंजगत्।।देवीजगतिसर्वत्रया

देविसोरमेवच॥यदक्षरंपरिभ्रष्टं मात्राहीनंतुयद्भवेत्॥क्षं
तुमर्हसिदेवेशकस्यनस्खलितंमनः॥७॥यानिकानिचपापा
निजन्मांतरकृतानिच॥तानिसर्वाणिनश्यंतुप्रदक्षिणंपदे
पदे॥८इतिप्रदक्षिणीकृत्य॥पुरुस्मृत्वा पूजयित्वाप्रणम्य
अर्घ्योदकेनात्मार्पणंमंत्रेणदेव्यैस्वात्मानंसमर्पयेत्॥ॐइक्षः
वंप्राणबुद्धिदेहधर्माधिकारतोजाग्रत्स्वप्नसुषुप्त्यवस्था
मनसावाचाकर्मणाहस्ताभ्यांपद्भ्यामुदरेणशिश्नायत्स्म ७१
तंयदुक्तंयत्कृतंतत्सर्वंब्रह्मार्पणंभवतुस्वाहामांमदीयंचसर्वं
श्रीमद्देव्यैगायत्र्यैस्वेष्टदेवतायैसमर्पये॥ॐतत्सत्॥तोमूल

मंत्रेणयोनिमुद्रांप्रदर्श्यदेवींविसर्जयेत्॥तत्रविशेषा
र्घ्यंचालयित्वामूलेनदेव्यैसमर्प्य॥तेनैवदेवींनीराज्यस्वस्व
नेस्थापयित्वासपुष्पाभ्यांहस्ताभ्याकृतांजलिर्देवींध्यायेत्॥
भगवतिदेवीगायत्रीक्षमस्वेतिवदेत्॥विभाव्यदेविमूर्तिगणप
त्यादिचतुरोदेवान्देवीमूर्तौविलीनान्॥विभाव्यदेवीमूर्ति
मपिलेजोरूपंभावयेत्॥ॐगच्छगच्छपरंस्थानंस्वस्थानपर
मेश्वरि॥यत्रब्रह्मादयोदेवानयुःपरमंपदंमित्यनेनसंहा
रमुद्रयानिर्मील्यमाकृष्याग्नायतनेतेजस्तथैवसुषुम्नार्म
नास्त्रीयरूक्मलेविसर्जयेत्॥ततोमूलेनप्राणानायामत्र

यंकृत्वा॥तिष्ठदेवीपरेस्थानेस्वस्थानेपरमेश्वरी॥यत्रब्रह्मादयः
सर्वेपुरास्तिष्ठंतिमेरदि॥इत्यनेनस्वहृदयेदेवीस्थापयेत्
७२ ततऋष्यादिकरषडंगन्यासपूर्वकंहृदिमानसंदेवीं पूजयेत्
तदास्मानमात्मनंभावयेत्॥ततईशान्यांचतुरस्रषट्को
णवृत्तत्रिकोणात्मकंमंडलंविधायतस्यनेऋत्यांगणेशनिर्मा
त्र्यैनमःलंबोदरायनमः॥वायव्येसूर्यनिर्मात्र्यैनमःतेज
श्चंडायनमः॥ईशान्येविष्णुनिर्मात्र्यैनमोंविष्वक्सेनाय ७३
नमः॥आग्नेयेमहेशानिर्मात्र्यैनमःचंडेश्वरायनमः॥ॐ

मध्येदेवीनिर्मात्र्यैनमःतेजश्चंडेश्वर्यैनमः॥इतस्ततस्तु
छिष्टंभुजःपूजयेत्॥ततःनिर्मात्र्यैमस्तकेभार्यैसर्वोपशे
षानुलेपनं॥नैवेद्यंनोपभुंजीतदत्वानक्तंशालिने॥इतिवि
श्वामित्रसंहितावचनात्॥अवशिष्टेचंदनेनमूलाभिमंत्रिते
नपूर्वोक्तविधिनातिलकंकृत्वा॥अर्घ्योदकंकिंचिन्नाशयनि
र्मात्र्यैतुशुचौदेशेधारणीयंसदेवहि॥तथाहवनिष्ठाः॥पु
ष्पादिकंसमाघ्रायशुचौदेशेक्षिपेत्॥देवतात्मासु
रंस्वस्यशिवाविहरदेवताद्विय॥इतिनित्यपूजाविधिः॥अत्र

पुरश्चरणार्थी तु दशांक्रमेण पूजा विधाय ॥ पूर्ववदुर्वादिकं ध्यात्वा
गुरुमंत्रदेवतात्मनोरैक्षणं विधाय देवीरूपमात्मानं स्मरेत्
७२ नूपुरश्चरणीयं तु चमाचरेत् ॥ तथाचोक्तं संहितात्रये ॥ २
गंधाद्येमानसैरिष्ट्वा षडंगन्यासपूर्वकं ॥ ध्यात्वेष्टदेवतादे
वतारूपमात्मानं प्रजपेन्मनुं ॥ शास्त्रदृष्टेनविधिनाभक्ति
मास्थिरमानसः ॥ संख्यापूर्तेपुनः कुर्याद्दशांशं प्राणसं
यमान् ॥ लभतेसिद्धिमतांसिद्धिं चतुर्विंशतिलक्षतः ॥ २
जपतोयुतसंख्यातैरथवाचसहस्रकैः ॥ उत्तममध्यम

प्रोक्तंकनिष्ठंचपुरःसरं ॥ लघ्वेलाध्वंकार्यंगौरवंतथा ॥
यदिकश्चिद्द्विजश्रेष्ठकृताचारोजितेंद्रियः ॥ तस्यसाविज्यादि
मंत्रःफलंयेवनसंशयः ॥ यस्मिंश्चनिगदेनैवजपस्तंध्याविधी
यते ॥ तत्रसर्वत्रमंत्राणांसंख्यादद्यिर्युगक्रमात् ॥ कृत्योक्तेवद
तेसंख्यात्रेतायांद्विगुणंभवेत् ॥ द्वापारेत्रिगुणाप्रोक्ताकलौ
संख्याचतुर्गुणेतिदेशंपायनसंहितावचनात् ॥ षण्णव
तिलक्षसंख्याकलौपुरश्चरणंभवति ॥ अथवातावसं
ख्यंअयुतानिसहस्राणिवास्यान्नियवगम्यते ॥ तथो

पुरश्चरणार्थी तु दशांक्रमेण पूजा विधाय ॥ पूर्ववदुर्वादिकं ध्यात्वा
गुरुमंत्रदेवतात्मनोरैक्यं दर्शयन् देवीरूपमात्मानं स्मरेत्
७२ न्यूनपुरश्चरणीयं न कुर्यात् ॥ तथाचोक्तं संहितात्रये ॥ २
गंधाद्यैरभ्यर्च्य शिष्यं षडंगन्यासपूर्वकं ॥ ध्यात्वैक्यं देवतादेवतारूपमात्मानं प्रजपेन्मनुं ॥ शास्त्रदृष्टेन विधिना भक्तिमास्थिरमानसः ॥ संख्यापूर्तिं पुनः कुर्यादृष्यादिप्राणसंयमान् ॥ लभतेऽभिमतां सिद्धिं चतुर्विंशतिलक्षतः ॥ ७३
जपतो युतसंख्यातैरथवाचसहस्रकैः ॥ उत्तममध्यम

प्रोक्तैकनिष्ठं च पुरःसरं ॥ लघ्वेलाघवकार्यगौरवेगौरवं तथा ॥
यदिकश्चिद्द्विजश्रेष्ठ कृताचारो जितेंद्रियः ॥ तस्यस्याद्विघ्नादि
मंत्रः फलं ह्येवन्संशयः ॥ यस्मिंश्च निगदेने वजपस्संख्याविधी
यते ॥ तत्रसर्वत्रमंत्राणां संख्यावद्भिर्युगक्रमात् ॥ कृत्योक्तेवक
लेसंख्या त्रेतायांद्विगुणंभवेत् ॥ द्वापरेत्रिगुणाप्रोक्ता कलौ
संख्याचतुर्गुणेतिदेशंपायन संहितावचनात् ॥ षण्णव
तिलक्षसंख्याकलौपुरश्चरणंभवति ॥ अथवातावत्संख्यं अयुतानि सहस्राणिवास्यादित्यवगम्यते ॥ तथा

जपोचपूर्वकंहोमस्तर्पणंचाभिषेचनं॥भूदेवभोजनंचैवंप्र
कोरेषापुरस्त्रिया॥इतिपंचागतःसिद्धिंमंत्रैःशीघ्रमवाप्नु
७४ यात्॥तेजस्वीब्रह्मवर्चस्वीनिग्रहानुग्रहक्षमः॥भवेदवि
रकालेनसत्यंजानीहिपार्वति॥इतिईश्वरवाक्यंतंत्रेश्यामले॥
होमाशक्तेजपंकुर्यद्धोमसंख्याचतुर्गुणं॥षडुणंवाष्टगु
णितंयथासंख्याद्विजैतपः॥स्वागतादिविनादेवीजपहोमा ७४
दिनिःफलं॥तस्मात्कुर्यात्प्रयत्नेनदेवीपूजनमादरात्॥ब्र
ह्मसंहितायां॥अशक्तावुक्तहोमस्तुजपस्तुद्विगुणोभवे

दिति॥तथा॥सुतीर्थेपुजपेन्मंत्रंपूर्वपापघनाशने॥भुद्धेदेहस्यमंत्रो
पंतनःसिद्धिंप्रयछति॥नाध्यातोनार्चितोमंत्रोगुरुभक्त्याप्रसीदति॥नाजपः
सिद्धिदोनेकुनाहुतःफलदोभवेत्॥पूजाध्यानंजपंहोमंतथाकर्मचतुष्टयं॥प्र
त्यहंसाधकःकुर्यात्स्वयंचेसिद्धिमिछति॥जपस्यांतेशिवंध्यायेध्यानस्यां
तेपुनर्जपेत्॥जपध्यानसमायुक्तःक्षीघ्रंसिध्यंतिमंत्रेयवित्॥कर्मणा
प्रबलेनैवप्रतिबंधविरोधिना॥यदिसिध्यंनलभतेद्विस्त्रिर्वापुनरा
चरेत्॥दैवेनोपहतोयंतमेहिकानिनकारयेत्॥नापराधोस्त्यस्य
किंचित्प्राप्नुयादुपहास्यतां॥आमुष्मिकंफलंतत्रभविष्यंतिव
राननेत्रे॥इहलोकमवाप्नोतिब्रह्मणासहमोदते॥अथवावि

ब्रुवंल्लोकंचविष्णोःसायोज्यतांव्रजेत्।।सूर्यस्यवाशिवस्यापि
चेद्दस्यंद्दस्यवापुनः।।यंयंकाममधीयीततंतंमाप्नोतिनिश्चि
तं।।जापत्रीमंत्रजाप्येनसंस्मरेत्तनस्यशयः।।भैरवादिनि
यताहारःसदाह्येतोविधीयते।।दिवाचेवजपंकुर्यात्पोरश्च
रणिकोद्विजः।।पत्रावल्यांपलाशस्यमिताहारीभवेन्निशी।।
कुशैर्विनिर्मितांयांतुशैय्यायांवस्त्रमास्तनः।।सयःप्रक्षा
लितंदत्वाएकाकीनिर्भयस्वपेत्।।एवंत्रतिदिनंकुर्या
यावत्संख्यानपूर्यते।।तदंतेमहतीपूजांकुर्याद्विप्रांश्चतर्प

येत्।।गंधमाल्यांबरैश्चैवभक्ष्यभोज्यैःसदक्षिणैः।।दीनांधकृ
पणानाथान्संतोष्यहृष्टमानसः।।गोभूहिरण्यवस्त्राद्यैः
संपूज्यगुरुमात्मनः।।मिष्टान्नंबंधुभिःसार्धंभुंजीतोत्सा
हपूर्वकं।।महांतमुत्सवंकुर्यात्तद्दिनेसाधकोत्तमः।।विधि
नैवंजपपूजाहोमादींश्चसमाचरेत्।।विधिहीनेप्रत्यभा
वस्तुत्कंशिवशासने।।निर्ऋतिर्विधिहीनानांफलहंति
चकर्मणां।।निशाचराधिपस्यंहिकुरुतेशंकराज्ञया।।इ
तिसंक्षेपः।।अत्रपूजाचत्रिविधाउत्तममध्यमकनिष्ठभेदो

त्र॥अग्निकार्यं प्रवक्ष्यामि सर्वविघ्नविनाशनं॥ द्रव्यशुद्धि समायु
क्तं उत्तमं पूजनं स्मृतं॥ अग्निकार्यविहीनं तु कालदेशानुसारतः॥
उपचारैर्युतं ज्ञेयं मध्यमं पूजनं स्मृतं॥ वस्त्रालंकारवस्तुनिवर्ज
यित्वा पथकविधं॥ केवलं पुष्पयोगं तु कनिष्ठं पूजनं भवेदिति
पूजाविस्तारतः कर्तुं यो नशक्नोति मानवः॥ यदि वा गरुडज्ञाद्यो
पूजयेद्दिष्टदेवतां॥ अथवा देवतामात्रं ध्यात्वा सम्यक्प्रपूजये
येत्र॥ अथवा मानसीकुर्यादात्मपूजामथापि वा॥ अथवा के
वलां पूजां वाचां कुर्याद्विचक्षणः॥ अर्चामात्रेष्वशक्तश्चेदथवा

दर्चनसाधनं॥ योऽतिनातिशक्तोऽतिकुर्यादर्चनदर्शनं॥ सं
पूज्यैवजपंकुर्यान्मंत्रंकेवलंजपेत्र॥ पूर्वपूर्वस्यचाशक्तौ मु
त्तरोत्तरमाचरेत्र॥ यस्येतदन्यथाकुर्यात्तदा निष्फलंस्म
तं॥ प्रभुः प्रथमकल्पस्यथानिकल्पेनवर्तते॥ वत्सांमदापि
कंतस्युर्मनेर्विद्यतेफलं॥ इतिविज्ञायसामर्थ्यमेकंपंथा
नमाचरेत्र॥ नैकंचपस्यविद्यत्सोधोयतिनसंशयः॥
इतिकल्पपुरश्चरणः कल्पोक्तप्रयोगाधिकारीभवति॥ व
त्सरादर्वाक्वाकस्मिद्विर्जायते॥ तदुक्तंशिवशासने॥ ए

वंसंपूजयेन्मंत्रीजपहोमादितत्परः।।ब्रह्मचर्यरतःशुद्धःशु
द्धदंतनखादिभिः।।संस्मरन्सर्ववनितासततंदेवतांधि
७७पा।।सर्वाभीष्टंलभेद्धीमान्मासेदृदृश्यंध्रुवं।।सुविमलनख
दंतपाणिपादोसुदिलमनःपरदूषणाभोनी।।हरिहरकमलो
द्भवांघ्रिभक्तोभवतिरमेतसरस्वतीनिवासः।।इतिनिगदि
तमेतद्ब्रह्मरुद्रादिदेवैःसवित्मनुविधानंवेदलक्षोक्तमार्ग्यं॥
सकलमपिचपूर्वैःकोशिताद्यैःकृतंयत्समभिमतफलं ७७
तेप्राप्नुयुःशीघ्रमेव।वेदशास्त्रपुराणानांमयमेवसुनि

श्चयः।।गायत्र्याजपहोमादिविधिःसर्वार्थसाधकः।। ।।
इतिश्रीशंकराचार्यैर्भगवद्भिःप्रकाशिता।।गायत्रीप
द्धतिःशुद्धःसांप्रदायाद्विजन्मनां।।हितायब्राह्मणानां
चब्रह्मवर्चःसमृद्धये।।लिखित्वापूजयेद्योनांसोपिसि
द्धिमवाप्नुयात्।। ।।इतिश्रीमदाचार्यविरचितासर्व
वेदशास्त्रपुराणतंत्रसंमतागायत्रीपद्धतिःसमाप्तः॥
जोगळेकरोपनामकहरिभट्टात्मजपरशुरामेणलिखापितंस्वार्थंपरार्थंच।।

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इति गायत्रीपद्धतिः समाप्तः॥